श्री शिवप्रातः स्मरणस्तोत्रम्

प्रातः स्मरामि भवभीतिहरं सुरेशं
गङ्गाधरं वृषभ वाहनम म्बिकेशम्।
खट्वाङ्ग शूल वरदा भयहस्तमीशं
संसार रोग हरमौषधम द्वितीयम्।।
प्रातर्नमामि गिरिशं गिरिजार्द्ध देहं
सर्गस्थिति प्रलय कारणमादि देवम्।
विश्वेश्वरं विजित विश्वमनोऽभिरामं
संसार रोगहरमौषधम द्वितीयम्।।
प्रातर्भजामि शिवमेकम नन्तमाद्यं
वेदान्तवेद्यमनघं पुरुषं महान्तम्।
नामादि भेद रहितं च विकार शून्यं
संसार रोग हरमौषधम द्वितीयम्।।
प्रातः समुत्थाय शिवं विचिन्त्य
श्लोक त्रयं येऽनुदिनं पठन्ति।
ते दुःखजातं बहु जन्म सञ्चितं
हित्वा पदं यान्ति तदेव शम्भोः।।

शिव मानस पूजा

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम्।
जातीचम्कबिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम्।।

सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम्।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभोस्वीकुरु।।
छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणाभेरिमृदङ्गकाहलकला गीतं च नृत्यं तथा।
साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत् समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो।।
आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्।।
करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधम्।
विहितमविहितं वा सर्वमेतत् क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शम्भो।।

शम्भुस्तुतिः

नमामि शम्भुं पुरुषं पुराणं, नमामि सर्वज्ञमपारभावम्।
नमामि रुद्रं प्रभुमक्षयं तं, नमामि शर्वं शिरसा नमामि।।
नमामि देवं परमव्ययं तं, उमापतिं लोकगुरुं नमामि।
नमामि दारिद्र्यविदारणं तं, नमामि रोगापहरं नमामि।।

नमामि कल्याणमचिन्त्यरूपं, नमामि विश्वोद्भवबीजरूपम्।
नमामि विश्वस्थितिकारणं तं, नमामि संहारकरं नमामि।।
नमामि गौरीप्रियमव्ययं तं, नमामि नित्यं क्षरमक्षरं तम्।
नमामि चिद्रूपममेयभावं, त्रिलोचनं तं शिरसा नमामि।।
नमामि कारुण्यकरं भवस्य, भयंकरं वाऽपि सदा नमामि।
नमामि दातारमभीप्सितानां, नमामि सोमेशमुमेशमादौ।।
नमामि वेदत्रयलोचनं तं, नमामि मूर्तित्रयवर्जितं तम्।
नमामि पुण्यं सदसद्व्यतीतं, नमामि तं पापहरं नमामि।।
नमामि विश्वस्य हिते रतं तं, नमामि रूपाणि बहूनि धत्ते।
यो विश्वगोप्ता सदसत्प्रणेता, नमामि तं विश्वपतिं नमामि।।
यज्ञेश्वरं सम्प्रति हव्यकव्यं, तथागतिं लोकसदाशिवो यः।
आराधितो यश्च ददाति सर्वं, नमामि दानप्रियमिष्टदेवम्।।
नमामि सोमेश्वरमस्वतन्त्रं, उमापतिं तं विजयं नमामि।
नमामि विघ्नेश्वरनन्दिनाथं, पुत्रप्रियं तं शिरसा नमामि।।
नमामि देवं भवदुःखशोक, विनाशनं चन्द्रधरं नमामि।
नमामि गङ्गाधरमीशमीड्यं, उमाधवं देववरं नमामि।।
नमाम्यजादीशपुरन्दरादि, सुरासुरैरर्चितपादपद्मम्।
नमामि देवीमुखवादनामी, क्षार्थमक्षित्रितयं य ऐच्छत्।।
पञ्चामृतैर्गन्धसुधूपदीपै, र्विचित्रपुष्पैर्विविधैश्च मन्त्रैः।
अन्नप्रकारैः सकलोपचारैः, सम्पूजितं सोममहं नमामि।।

वन्दे शिवं शंकरम्

वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम्।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्।।
वन्दे सर्वजगद्विहारमतुलं वन्देऽन्धकध्वंसिनं
वन्दे देवशिखामणिं शशिनिभं वन्दे हरेर्वल्लभम्।
वन्दे नागभुजङ्गभूषणधरं वन्दे शिवं चिन्मयं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्।।
वन्दे दिव्यमचिन्त्तमद्वयमहं वन्देऽर्कदर्पापहं
वन्दे निर्मलमादिमूलमनिशं वन्दे मखध्वंसिनम्।
वन्दे सत्यमनन्तमाद्यमभयं वन्देऽतिशान्ताकृतिं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्।।
वन्दे भूरथमम्बुजाक्षविशिखं वन्दे श्रुतित्रोटकं
वन्दे शैलशरासनं फणिगुणं वन्देऽधितूणीरकम्।
वन्दे पद्मजसारथिं पुरहरं वन्दे महाभैरवं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्।।
वन्दे पञ्चमुखम्बुजं त्रिनयनं वन्दे ललाटेक्षणं
वन्दे व्योमगतं जटासुमुकुटं चन्द्रार्धगङ्गाधरम्।
वन्दे भस्मकृतत्रिपुण्ड्रजटिलं वन्देष्टमूर्त्यात्मकं

वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्।।
वन्दे कालहरं हरं विषधरं वन्दे मृडं धूर्जटिं
वन्दे सर्वगतं दयामृतनिधिं वन्दे नृसिंहापहम्।
वन्दे विप्रसुरार्चिताङ्घ्रिकमलं वन्दे भगाक्षापहं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्।।
वन्दे मङ्गलराजताद्रिनिलयं वन्दे सुराधीश्वरं
वन्दे शङ्करमप्रमेयमतुलं वन्दे यमद्वेषिणम्।
वन्दे कुण्डलिराजकुण्डलधरं वन्दे सहस्रानन
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्।।
वन्दे हंसमतीन्द्रियं स्मरहरं वन्दे विरूपेक्षणं
वन्दे भूतगणेशमव्ययमहं वन्देऽर्थराज्यप्रदम्।
वन्दे सुन्दरसौरभेयगमनं वन्दे त्रिशूलायुधं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्।।
वन्दे सूक्ष्ममनन्तमाद्यमभयं वन्देऽन्धकारापहं
वन्दे फूलननन्दिभृङ्गिविनतं वन्दे सुपर्णावृतम्।
वन्दे शैलसुतार्धभागवपुषं वन्देऽभयं त्र्यम्बकं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम्।
वन्दे पावनमम्बरात्म विभवं वन्दे महेन्द्रेश्वरं
वन्दे भक्तजनाश्रयामरतरुं वन्दे नताभीष्टदम्।
वन्दे जह्नुसुताम्बिकेशमनिशं वन्दे गणाधीश्वरं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्।।

शिवस्तोत्रम्

ॐ विश्वेश्वराय नरकार्णव तारणाय
ज्ञानप्रदाय करुणामृत सागराय
कर्पूरकुन्द धवलेन्दु जटाधराय
दारिद्य्र दुःख दहनाय नमः शिवाय।।

गौरीप्रियाय निशिराज कलाधराय
लोकान्तकाय भुजगाधिप कङ्कणाय।
गङ्गाधराय जलदानव मर्दनाय
दारिद्य्र दुःख दहनाय नमः शिवाय।।

भानु प्रियाय भवसागर नाशनाय
कामान्तकाय कमलाप्रिय पूजिताय।
नेत्र त्रयाय शुभलक्षण लक्षिताय
दारिद्य्र दुःख दहनाय नमः शिवाय।।

पञ्चाननाय फणि राजविभूषणाय
स्वर्गापवर्ग फलदाय विभूतिदाय।
हैमांशुकाय भवन त्रय वन्दिताय
दारिद्य्र दुःख दहनाय नमः शिवाय।।

भक्ति प्रियाय भव रोग भया पहाय
दिव्याय दिव्य वसनाय गुणार्णवाय
तेजो मयाय सकलार्थ दसंस्थिताय
दारिद्य्र दुःख दहनाय नमः शिवाय।।

रामप्रियाय रघुनाथ वर प्रदाय
नाथप्रियाय नगराज सुताप्रियाय।

पुण्याय पुण्य चरिताय सुरार्चिताय
दारिद्र्य दुःख दहनाय नमः शिवाय।।
चर्माम्बराय चितिभस्म विलेपनाय
भालेक्षणाय मणिकुण्डल मण्डिताय।
मञ्जीरपाद युगलाय वृषध्वजाय
दारिद्र्य दुःख दहनाय नमः शिवाय।।
मुक्ताय यज्ञफलदाय गणेश्वराय
गीतप्रियाय वृषभेश्वर वाहनाय।
मातङ्गचर्म वसनाय महेश्वराय
दारिद्र्य दुःख दहनाय नमः शिवाय।।
वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिकृन्तनम्।
सर्वकामप्रदं नृणां हत्याकोटिविनाशनम्
ब्रह्मघ्नो वा सुरापोवा स्त्रीहन्तागुरुतल्पगः।
यः पठेच्छिवसान्निध्यं शिव सायुज्यमाप्नुयात्।।
इति वसिष्ठकृतं शिवस्तोत्रम्।

ॐ **नमः शिवाय**

उत्पलदेवकृतं संग्रहस्तोत्रम्

संग्रहेण सुखदुःखलक्षणां
मां प्रति स्थितमिदं शृणु प्रभो!
सौख्यमेष भवता समागमः
स्वामिना विरह एव दुःखिता।।
अन्तरप्यतितरामणीयसी
या त्वदप्रथनकालिकास्ति मे।

तामपीश परिमृज्य सर्वतः
स्वं स्वरूपममलं प्रकाशय।।
तावके वपुषि विश्वनिर्भरे
चित्सुधारसमये निरत्यये।
तिष्ठतः सततमर्चतः प्रभुं
जीवितं मृतमथान्यदस्तु मे।।
ईश्वरोऽहमहमेव रूपवान्
पण्डितोऽस्मि सुभगोऽस्मि कोऽपरः।
मत्समोऽस्ति जगतीति शोभते
मानिता त्वदनुरागिणाः परम्।।
देवदेव भवदद्वयामृता
ख्यातिसंहरणलब्धजन्मना।
तद्यथास्थितपदार्थसंविदा
मां कुरुष्व चरणार्चनोचितम्।।
ध्यायते तदनु दृश्यते ततः
स्पृश्यते च परमेश्वरः स्वयम्।
यत्र पूजनमहोत्सवः स मे
सर्वदास्तु भवतोऽनुभावतः।।
यद्यथास्थितपदार्थदर्शनं
युष्मदर्चन महोत्सवश्च यः
युग्ममेतदितरेतराश्रयं
भक्तिशालिषु सदा विजृम्भते।।
तत्तदिन्द्रियमुखेन सन्ततं

युष्मददर्चनरसायनासवम्।
सर्वभावचषकेषु पूरिते
ष्वापिबन्नपि भवेयमुन्मदः।।
अन्यवेद्यमणुमात्रमस्ति न
स्वप्रकाशमखिलं विजृम्भते।
यत्र नाथ भवतः पुरेस्थितिं
तत्र मे कुरु सदा तवार्चितुः।।
दासधाम्नि विनियोजितोऽप्यहं
स्वेच्छयैव परमेश्वर त्वया।
दर्शनेन न किमस्मि पात्रितः
पादसंवहनकर्मणापि वा।।
शक्तिपातसमये विचारणं
प्राप्तमीश न करोषि कर्हिचित्।
अद्य मां प्रति किमागतं यतः
स्वप्रकाशनविधौ विलम्बसे।।
तत्र तत्र विषये बहिर्विभा
त्यन्तरे च परमेश्वरीयुतम्।
त्वां जगत्त्रितयनिर्भरं सदा
लोकयेय निजपाणिपूजितम्।।
स्वामिसौधमभिसन्धिमात्रतो
निर्विबन्धमधिरुह्य सर्वदा।
स्यां प्रसादपरमामृतासवा
पानकेलिपरिलब्धनिर्वृतिः।।

यत्समस्तसुभगार्थवस्तुषु
स्पर्शमात्रविधिना चमत्कृतिम्।
तां समर्पयति तेन ते वपुः
पूजयन्त्यचलभक्तिशालिनः।।
स्फारयस्यखिलमात्मना स्फुरन्
विश्वमामृशसि रूपमामृशन्।
यत्स्वयं निजरसेन घूर्णसे
तत्समुल्लसति भावमण्डलम्।।
योऽविकल्पमिदमर्थमण्डलं
पश्यतीश निखिलं भवद्वपुः।
स्वात्मपक्षपरिपूरिते जग
त्यस्य नित्यसुखिनः कुतो भयम्।।
कण्ठकोणविनिविष्टमीश ते
कालकूटमपि से महामृतम्।
अप्युपात्तममृतं भवद्वपु
र्भेदवृत्ति यदि रोचते न मे।।
त्वत्प्रलापमयरक्तगीतिका
नित्ययुक्तवदनोपशोभितः।
स्यामथापि भवदर्चनक्रिया
प्रेयसीपरिगताशयः सदा।।
ईहितं न बत पारमेश्वरं
श्यक्यते गणयितुं तथा च मे।
दत्तमप्यमृतनिर्भरं वपुः

स्वं न पातुमनुमन्यते तथा।।
त्वामगाधमविकल्पमद्वयं
स्वं स्वरूपमखिलार्थघस्मरम्।
आविशन्नहमुमेश सर्वदा
पूजयेयमभिसंस्तुवीय च।।

पण्डित् शिव कौल कृता
आक्रन्दमानगिरया शिवस्तुतिः

(रोती हुई वाणी में भक्ति-भाव से भगवान शिव की आराधना)

रे चित्त! भीत! चपल! विपुलां विहाय
चिन्तां, समाश्रय पदद्वयमार्तबन्धोः।
आक्रन्दमानगिरया परया च भक्त्या
जन्मादिदुःखशमनमभिप्रार्थयस्व।।
किं त्वं मुधा कथय संसरणाख्यघोरां
गारेषु कातरतयाऽभिपचन् स्थितोऽसि?
दैन्यं विहारय भवदुःखविमुक्तये त्वं
आराधनां कुरु शिवस्य, तथाऽत्र वक्ष्ये।।
हा किं न पश्यसि दृढैरपि पाशजालैः
मां हन्तुमिच्छति पशुमिव कालव्याधः।
कालान्तकारक! महेश्वर! क्वासि, क्वासि?
भीतं न पालयसि किं? जगतां निवासिन्।।
आः किं न उद्धरसि नाथ निमज्जमानं

मोहार्णवेऽतिगहने भवभारक्षिण्णम्?
मा पश्य मत्कुकृतिमप्यतिगर्हितां च
वीक्षस्व स्वां महदनुग्रहशक्तिमेव।।
कष्टं करालदशनो ह्यपि कालव्यालो
दष्टुं महत्तरजवेन प्रधावति माम्।
नष्टुं किमस्य तव शक्तिरपोहितैव
येनातुरं हि उरगाय ह्यु पेक्षसे माम्।।
दग्धुं कुकर्मपवनेन च दीप्यमानः
कालानलोऽयमभितो ह्यचिरात्प्रयाति।
भस्मीकरोत्यहह मां झटिति पिनाकिन्!
शान्तिं नयस्व सुकृपामृतवर्षणेन।।
रुग्नः लुठाम्यवनि भग्नकटीव सर्पः
कंदर्पदर्पहर! मे हरसि न दुःखम्।
को वा परः त्वदपरः वरणर्ह ब्रूहि
यं त्वां विहाय कृपणः शरणं गमिष्ये।।
आर्तोऽस्म्यहं हि विलपामि त्वदङ्घ्रिलग्नः
त्वं तु सुविस्मृतिप्रदौषधिपानमग्नः।
एतत् चरित्रमुभयोरवलोकमानाः
त्वां शीघ्रतोषित! कथं जगति स्तुवन्ति।।
शक्नोसि त्वं यदि न संसृतिदुःखमेतत्
हर्तुं समर्थयसि नार्थिनमुत्तरञ्च।
नार्हामि चेत् तवकृपालवलेशमीश

शीघ्रं बहिष्कुरु तथापि प्रपंचकोशात्।।
याचे न वैश्रवणकोशसमाधिकारं
नो वाऽमरेन्द्रसमतां न दिवि विहारम्।
भोगेच्छयापि भगवन्! न च सार्वभौमं
यच्चिन्तया तव मनः ननु खेदमायात्।।
दीनोऽस्मि कर्मगतिना सरणौ निक्षिप्तः
जन्मजरामरणव्याधिशतैश्वतप्तः।
त्वामर्थयामि गिरिजावर! एतदेव
मामुद्धराशु कृपया ननु कोऽत्र खेदः।।
त्वं चेन्न उद्धरसि मां हरसि न तापं
पापस्य स्वस्य फलमेव तु तद्विजाने।
किंच जनास्तवगुणानुस्मृणे वदेरन्
नैवार्तत्राणकुशलो जटिलो कपाली।।
यच्च त्वया त्रिपुरधानवध्वंसकाले
यच्चान्तकान्तकरणे दहने स्मरस्य!
दिव्यं बलमतुलमीश! प्रदर्शितं तत्
दीनस्य त्राणकरणावसरे क्व यातम्।।
त्वं निर्बलोस्यप्यथवा बलवत्तरोऽसि
कर्त्तुं कृपां त्वमक्षमोस्यथवा क्षमोऽसि।
स्वामिन्! ममासि भवदङ्घ्रियुगं कथञ्चित्
प्राप्तोऽस्मि नाथ! शरणं न तु तं विमुञ्चे।।
स्वामिन्! विनापि विनयेन यदि त्वदग्रे

तीक्ष्णैः पदैः प्रकटयामि च स्वाभिसंधिम्।
लज्जोज्झितत्वमपि तत् भगवन्! क्षमोऽसि
सोढुं भवान् पितुरिवार्भकदुर्वचांसि।।
आक्रन्दनस्तुतिरियं शिवसन्निधाने
भक्त्या तु दीनमनसा पठति पुमान् यः।
तस्य नगेन्द्रतनुजापतिराशुतोषः
दुर्वार दुःखशमनं दयया करोति।।

शिवापराधक्षमापन स्तोत्रम्

आदौ कर्म प्रसङ्गात्कलयति कलुषं मातृकुक्षौ स्थितं मां
विण्मूत्रामेध्यमध्ये क्वथयति नितरां जाठरो जातवेदाः।
यद्यद्वै तत्र दुःखं व्यथयति नितरां शक्यते केन वक्तुं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शम्भो।।
बाल्ये दुःखातिरेको मललुलितवपुः स्तन्यपाने पिपासा
नो शक्तश्चेन्द्रियेभ्यो भवगुणजनिता जन्तघो मां तुदन्ति।
नानारोगादिदुःखाद्रु दनपरवशः शङ्करं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शम्भो।।
प्रौढोऽहं यौवनस्थो विषयविषधरैः पञ्चभिर्मर्मसन्धौ
दष्टो नष्टोऽविवेकः सुतधनयुवति स्वादसौख्ये निषण्णः।
शैवीचिन्ताविहीनं मम हृदयमहो मानगर्वाधिरूढं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शम्भो।।
वार्द्धक्ये चेन्द्रियाणां विगतगतिमति श्चाधिदैवादितापैः

पापै रोगैवियोगैस्त्वनवसितवपुः प्रौढिहीनं च दीनम्।
मिथ्यामोहाभिलाषै र्भ्रमति मम मनो धूर्जटेर्ध्यानशून्यं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शम्भो।।
नो शक्यं स्मार्तकर्म प्रतिपदगहन प्रत्यवायाकुलाख्यं
श्रौते वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गे सुसारे
नास्था धर्मे विचारः श्रवणमननयोः किं निदिध्यासितव्यं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शम्भो।।
स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गाङ्गतोयं
पूजार्थं वा कदाचिद्बहुतरगहनार्तखण्डबिल्वीदलानि।
नानीता पद्ममाला सरसि विकसिता गन्धधूपौ त्वदर्थं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शम्भो।।
दुग्धैर्मध्वाज्ययुक्तैर्दधिसितसहितैः स्नापितं नैव लिङ्गं
नो लिप्तं चन्दनाद्यैः कनकविरचितैः पूजितं न प्रसूनैः।
धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैव भक्ष्योपहारैः
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शम्भो।।
ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो
हव्यं ते लक्षसंख्यैर्हुतवहदने नार्पितं बीजमन्त्रैः।।
नो तप्तं गाङ्गतीरे व्रतजपनियमै रुद्रजाप्यैर्न वेदैः
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शम्भो।।
स्थित्वा स्थाने सरोजे प्रणवमयमरुत्कुम्भके सूक्ष्ममार्गे
शान्ते स्वान्ते प्रलीने प्रकटितविभवे ज्योतिरूपे पराख्ये।
लिङ्गज्ञे ब्रह्मवाक्ये सकलतनुगतं शङ्करं न स्मरामि

क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शम्भो।।
नग्नो निःसङ्गशुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो
नासाग्रे न्यस्तदृष्टिर्विदितभवगुणो नैव दृष्टः कदाचित्।
उन्मन्यावस्थया त्वां विगतकलिमलं शङ्करं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शम्भो।।

श्रीआदित्यहृदयस्तोत्रम्

इस 'आदित्यहृदय' नामक स्तोत्र का विनियोग एवं न्यासविधि इस प्रकार है।

विनियोग

ॐ अस्य आदित्य हृदय स्तोत्रस्य अगस्त्यऋषिः अनुष्टुप छन्दः, आदित्य हृदयभूतो भगवान् ब्रह्मा देवता निरस्ताशेष- विघ्नतया ब्रह्मविद्यासिद्धौ सर्वत्र जयसिद्धौ च विनियोगः।

ऋष्यादिन्यास

ॐ अगस्त्य ऋषये नमः, शिरसि। अनुष्टुप्छन्दसे नमः, मुखे। आदित्य हृदय भूत ब्रह्मदेवतायै नमः, हृदि। ॐ बीजाय नमः, गुह्ये। रश्मिमते शक्तये नमः, पादयोः। ॐ तत्सवितुः इत्यादि गायत्री- कीलकाय नमः, नाभौ।

करन्यास

इस स्तोत्र के अङ्गन्यास और करन्यास तीन प्रकार से किये जाते हैं। केवल **प्रणवसे**, गायत्रीमन्त्र से अथवा '**रश्मिमते नमः**' इत्यादि छः नाम-मन्त्रों से। यहाँ नाम-मन्त्रों से किये जाने वाले न्यास का प्रकार बताया जाता है—

ॐ रश्मिमते अङ्गुष्ठाभ्यां नमः। ॐ समुद्यते तर्जनीभ्यां नमः। ॐ देवासुरनमस्कृताय मध्यमाभ्यां नमः। ॐ विवस्वते अनामिकाभ्यां नमः। ॐ भास्कराय कनिष्ठिकाभ्यां नमः। ॐ भुवने श्वराय करतलकर पृष्ठाभ्यां नमः।

हृदयादि अंगन्यास

ॐ रश्मिमते हृदयाय नमः। ॐ समुद्यते शिरसे स्वाहा। ॐ देवासुरनमस्कृताय शिखायै वषट्। ॐ विवस्वते कवचाय हुम्। ॐ भास्कराय नेत्रत्रयाय वौषट्। ॐ भुवनेश्वराय अस्त्राय फट्। इस प्रकार न्यास करके निम्नाङ्कित मन्त्र से भगवान् सूर्य का ध्यान एवं नमस्कार करना चाहिये—

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्।

तत्पश्चात् 'आदित्यहृदय' स्तोत्र का पाठ करना चाहिये।

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम्।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम्।।1।।
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम्।
उपगम्याब्रवीद्-राममगस्त्यो भगवांस्तदा।।2।।
राम राम महाबाहो शृणु गुह्यं सनातनम्।
येन सर्वानरीन् वत्स समरे विजयिष्यसे।।3।।
आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपं नित्यमक्षयं परमं शिवम् ।।4।।
सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोक प्रशमनम आयुर्वर्धनम् उत्तमम् ।।5।।
रश्मिमन्तं समुद्यन्तं देवासुर नमस्कृतम्।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ।।6।।

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ।
एष देवासुरगणाँ ल्लोकान् पाति गभस्तिभिः ।।7।।
एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः।
महेन्द्रो धनदः कालो यमः सोमो ह्यपाम्पतिः ।।8।।
पितरो वसवः साध्या अश्विनौ मरुतो मनुः ।
वायुर्वह्निः प्रजाः प्राण ऋतुकर्ता प्रभाकरः ।।9।।
आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान्।
सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ।।10।।
हरिदश्वः सहस्रार्चिः सप्तसप्ति र्मरीचिमान् ।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्तण्डकोंऽशुमान् ।।11।।
हिरण्यगर्भः शिशिरः तपनोऽहस्करो रविः।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ।।12।।
व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः ।
घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवङ्गमः ।।13।।
आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ।।14।।
नक्षत्रग्रहताराणाम् अधिपो विश्वभावनः।
तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते ।।15।।
नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ।
ज्योतिर्गणानां पतये दिनाधिपतये नमः ।।16।।
जयाय जयभद्राय हर्यश्वाय नमो नमः ।
नमो नमः सहस्रांशो आदित्याय नमो नमः ।।17।।
नम उग्राय वीराय सारङ्गाय नमो नमः ।
नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते ।।18।।
ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ।।19।।

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ।।20।।
तप्तचामीकराभाय हरये विश्वकर्मणे ।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ।।21।।
नाशयत्येष वै भूतं तमेष सृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ।।22।।
एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ।।23।।
देवाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः ।।24।।
एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ।।25।।
पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ।।26।।
अस्मिन् क्षणे महाबाहो रावणं त्वं जहिष्यसि ।
एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ।।27।।
एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत् तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ।।28।।
आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ।।29।।
रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागमत् ।
सर्वयत्नेन महता वृतस्तस्य वधेऽभवत् ।।30।।
अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः।
निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ।।31।।

।। श्रीवाल्मीकीये रामायणे युद्धकाण्डे,
अगस्त्यप्रोक्तमादित्यहृदयस्तोत्रं सम्पूर्णम्।।

श्रीशिवमहिम्नः स्तोत्रम्

पुष्प-दन्त उवाच

महिम्नः पारं-ते परम्-विदुषो यद्य-सदृशी
स्तुतिर्-ब्रह्मादीनाम्-अपि तद-वसन्नाः-त्वयि गिरः।
अथा-वाच्यः सर्वः स्वमति-परिणामा-वधि गृणन्।
ममा-प्येष-स्तोत्रे हर ! निर्-अपवादः परिकरः (1)

अतीतः पन्थानं तव च महिमा वाङ्-मनोसयोर्-
अतत्-व्यावृत्त्या यं चकितम्-अभिधते श्रुतिर् अपि।
स कस्य-स्तोतव्यः कतिविध-गुणः कस्य विषयः
पदे-त्वा-र्वाचीने पतति न मनः कस्य न वचः (2)

मधु-स्फीता वाचः परमम्-अमृतं निर्मितवतः
तव ब्रह्मन्-किं वाक्-अपि सुरगुरो-र्विस्मय-पदम्।
मम त्वेतां वाणीं गुण-कथन-पुण्येन भवतः
पुनामी-त्यर्थेऽस्मिन्-पुर-मथन ! बुद्धि-र्व्यवसिता (3)

तवैश्वर्यं-यत-तत्-जगत-उदय-रक्षा-प्रलय-कृत्
त्रयी-वस्तु व्यस्तं तिसृषु गुण-भिन्नासु तनुषु।
अभव्यानाम्-अस्मिन्-वरद रमणीयाम्-अरमणीम्
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः (4)

किम् ईहः किं कायः स खुल किमुपायः त्रिभुवनम्
किम् आधारो धाता सृजति किम्-उपादन-इति च
अतर्क्यै-श्वर्य्ये त्वय्य-नव-सर दुःस्थो-हतधियः
कुतर्कोऽयं कान्-चित्-मुखरयति मोहाय जगतः (5)

अजन्मानो-लोकाः किम्-अवयव-वन्तोपि जगताम्
अधिष्ठातारं किं भव-विधिर्-अनादृत्य भवति।

अनीशो वा कुर्यात् भवुन-जनने कः परिकरो।
यतो मन्दाः-त्वां प्रत्यमरवर ! संशेरत इमे (6)
त्रयी सांख्यं योगः पशुपति-मतं वैष्णवम्-इति
प्रभिन्ने प्रस्थाने परम्-इदम्-अधः पथ्यम्-इति-च।
रुचीनां वैचित्र्यात्-ऋजु-कुटिल-नाना-पथ जुषाम्
नृणाम्-एको गम्यः-त्वमसि पयसाम्-अर्णव इव (7)
महोक्षः खट्वांगं परशु-रजिनं भस्म फणिनः
कपालं चे ती यत्-तव वरद। तन्त्रोपकरणम्।
सुरास्तां ताम्-ऋद्धिं दधति तु भवत्-भ्रूप्रणिहितां
नहि स्वात्मा रामं विषय-मृग तृष्णा भ्रमयति (8)
ध्रुवं कश्चित्-सर्वं सकलम्-अपरस्त्व-ध्रुवम्-इदं
परो ध्रौव्या ध्रौव्ये जगति गदति व्यस्त विषये।
समस्ते प्ये-तस्मिन्-पुरमथन ! तै र्विस्मित इव
स्तुवन्-जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता (9)
तवै-श्वर्यं यत्नात् यत्-उपरि विरिञ्चो-हरिर्-अधः
परिच्छेतुं यातौ-अनलम्-अनलस्कन्ध-वपुषः।
ततो भक्ति-श्रद्धा-भर-गुरु-गृणत्-भ्यां गिरिश ! यत्
स्वयं तस्थे ताभ्यां तव किम्-अनुवृत्ति-र्न फलति (10)
अयत्नात्-आसाद्य त्रिभुवनम्-अवैर-व्यतिकरम्
दशास्यो यत्-बाहून-अभृत रण कण्डू-पर-वशान्
शिरः पद्म-श्रेणी-रचित-चरणाम्भोरुह-बलेः
स्थिरायास्त्व्-भक्तेः-त्रिपुर-हर ! विस्फूर्जितम्-इदम् (11)
अमुष्य त्वत्-सेवा-सम्-अधिगत-सारं भुजवनम्
बलात्-कैलासेपि त्वत्-अधि-वसितौ विक्रम-यतः।
अलभ्यः-पाताले-प्यलस-चलितांगुष्ठ-शिरसि

प्रतिष्ठा-त्वयासीत्-ध्रुवम्-उपचितो मुह्यति खलः (12)
यत्-ऋद्धिं सुत्राम्णो वरद ! परमोचैर्-अपि सतीम्
अधश्चक्रे बाणः परिजन-विधेय-त्रिभुवनः।
न तत्-चित्रं तस्मिन् वरि-वसितरि त्वत्-चरणयोः
न कस्या-प्युन्नत्यै भवति शिर-सस्त्वय्य-वनतिः (13)
अकाण्ड-ब्रह्माण्ड-क्षय-चकित-देवा-सुर-कृपा
विधेयस्यासीत्-यस्त्रिनयन विषं संहृतवतः।
स कल्माषः कण्ठे तव न कुरुते न श्रियम्-अहो
विकारोपि श्लाघ्यो भुवन-भय-भंग-व्यसनिनः (14)
असिद्धार्था नैव क्वचित्-अपि सदेवा-सुर-नरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः।
स पश्यन्-ईश त्वाम्-इतर-सुर-साधारणम्-अभूत्
स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः (15)
मही पादाघातात्-व्रजति सहसा संशयपदम्
पदं विष्णोर्-भ्राम्यत्-भुज-परिघ-रुग्ण-ग्रह-गणम्।
महुर्-द्यौर्-दौस्थ्यं यात्यनि-भृत-जटा-ताडित-तटा
जगत्-रक्षायै त्वं नटसि ननु वामैव विभुता (16)
वियत्-व्यापी तारागण-गुणित-फेनोत्-गम-रुचिः
प्रवाहो वारां यः पृषत-लघु-दृष्टः शिरसि ते।
जगत्-द्वीपाकारं जलधि-वलयं तेन कृतमि-
त्येननै-वोन्नेयं धृत-महिम दिव्यं तव वपुः (17)
रथः क्षोणी यन्ता शतधृतिर्-आगेन्द्रो धनु-रथो
रथांगे चन्द्रार्कौ रथ-चरण-पाणिः शर इति।
दिधक्षोस्ते कोयं त्रिपुर-तृणम्-आडम्बर-विधिः
विधेयैः क्रीडन्त्यो न खलु-परतन्त्राः प्रभुधियः (18)

हरिस्ते साहस्रं कमल-बलिम्-आधाय पदयोः
यत्-एकोने तस्मिन्-निजम्-उदहरत्-नेत्र-कमलम्।
गतो भक्त्युद्रेकः परिणतिम्-असौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुर-हर। जागर्ति जगताम् (19)
क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते।
अतस्त्वां उत्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्धवा दृढपरिकरः कर्मसु जनः (20)
क्रियादक्षो दक्षः क्रतुपतिर्-अधीशस्तनु-भृताम्
ऋषीणाम्-आर्त्विज्यं शरणद ! सदस्याः सुरगणाः
कृतुभ्रंशस्त्वतः क्रतुफल-विधान-व्यसनिनो
ध्रुवं-कर्तुः श्रद्धा-विधुरम्-अभिचाराय हि मखाः (21)
प्रजानाथं नाथ ! प्रसभम्-अभिकं स्वां दुहितरं
गतं रोहित्-भूतां रिर-मयिषुम्-ऋष्यस्य वपुषा
धनुष्पाणे-र्यातं दिवम्-अपि सपत्रा-कृतम्-अमुम्
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याध-रभसः (22)
स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि।
यदि स्त्रैणं देवी यमनिरत देहार्धघटना-
दवैति त्वामद्धा बत वरद मुग्धा युवतयः (23)
श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद परमं मङ्गलमसि (24)
मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः।

यदालोक्याल्हादं ह्रद इव निमज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत् किल भवान् (25)
त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि (26)
त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत् तीर्णविकृति।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम् (27)
भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम्।
अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रविहितनमस्योऽस्मि भवते (28)
नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः (29)
बहुल-रजसे विश्वो-त्पत्तौ भवाय नमो नमः
प्रबल-तमसे तत् संहारे-हराय नमोनमः
जनसुख-कृते सत्त्वो-द्रिक्तौ मृडाय नमोनमः
प्रमहसि पदे नि-स्त्रैगुण्ये-शिवाय नमोनमः (30)
कृशपरिणति चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः।
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद चरणयोस्ते वाक्यपुष्पोपहारम् (31)

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति (32)
इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः (33)
तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर।
यादृशोऽसि महादेव तादृशाय नमो नमः (34)
एककालं द्विकालं वा त्रिकालं यः पठेन्नरः।
सर्वपापविनिर्मुक्तः शिवलोके महीयते (35)
श्री पुष्पदन्त-मुख-पंकज निर्गतेन
स्तोत्रेण किल्विष-हरेण हर-प्रियेण।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपति-र्महेशः (36)
।। इति शुभम् ।।

आरती शंकर जी

जय शिव ओंकारा, भज जय शिव ओंकारा।
ब्रह्मा विष्णु सदाशिव, अर्द्धंगी धारा,
ओ३म् हर हर महादेव।।
एकानन चतुरानन पंचानन राजे,
स्वामी पंचानन राजे।
हंसानन गरुड़ासन वृषवाहन साजे,
ओ३म् हर हर महादेव।।
दो भुज चारु चतुर्भुज दश भुज अति सोहे,

स्वामी दस भुज अति सोहे।
तीनों रूप निखरत, त्रिभुवन-जन मोहे,
ओ३म् हर हर महादेव।।
अक्षमाला वनमाला मुण्डमाला धारी,
स्वामी मुण्डमाला धारी।
त्रिपुरारी कंसारी करमाला धारी,
ओ३म् हर हर महादेव।।
श्वेताम्बर पीताम्बर बाघाम्बर अंगे,
स्वामी बाघाम्बर अंगे।
सनकादिक गरुड़ादिक भूतादिक संगे,
ओ३म् हर हर महादेव।।
कर मध्ये सुकमण्डलु चक्र त्रिशूल
धारी, स्वामी चक्र त्रिशूल धारी।
सुखकारी दुखहारी जग-पालन
कारी, ओ३म् हर हर महादेव।।
ब्रह्मा विष्णु सदाशिव जानत अविवेका,
स्वामी जानत अविवेका।
प्रणवाक्षर में शोभित ये तीनों एका,
ओ३म् हर हर महादेव।।
त्रिगुण स्वामी की आरती जो कोई
नर गावे, स्वामी जो कोई नर गावे।

कहत शिवानन्द स्वामी मनवांछित फल पावे, ओ३म् हर हर महादेव।।

शिवजी की आरती

शिवोहं शिवोहं शिवोहं शिवोहं
सर्व विश्व का जो परमात्मा है,
सभी प्राणियों की वही आत्मा है।
वही आत्मा सच्चिदानन्द में हूँ,
शिवोहं शिवोहं शिवोहं शिवोहं
जिसे शस्त्र काटे न अग्नि जलावे
न पानी गलावे न मृत्यु मिटावे।
वही आत्मा सच्चिदानन्द में हूँ
शिवोहं शिवोहं शिवोहं शिवोहं
अजर और अमर जिस को वेदों ने गाया
यही ज्ञान अर्जुन को हरि ने सुनाया।
अमर आत्मा है मरण शील काया,
सभी प्राणियों के जो घट में समाया।
वही आत्मा सच्चिदानन्द में हूँ,
शिवोहं शिवोहं शिवोहं शिवोहं
है तारी से तारों में प्रकाश जिस का,
है चन्द्र व सूर्य में है वास जिस का
वही आत्मा सच्चिदानन्द में हूँ,

शिवोहं शिवोहं शिवोहं शिवोहं।
शिवोहं शिवोहं शिवोहं शिवोहं,
शिवोहं शिवोहं शिवोहं शिवोहं।।

विष्णु प्रार्थना

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं।
विश्वाधारं गगनसद्रश्यं मेघवर्ण शुभाङ्गम्।
लक्ष्मी कान्तं कमलनयनं योगिभिर्ध्यान गम्यं।
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ।
यस्य हस्ते गदा चक्रं गुरुडो यस्य वाहनं।
शंखः करतले यस्य स मे विष्णुः प्रसीदतु ।
यद्बल्ये यश्च कौमारे यत् यौवने कृतं मया,
वयः परिणतौ यश्च यक्ष्च जन्मात्तरेषुच।
कर्मणा मनसा वाचा यापापं समुवर्जितं
तन्नारायण गोविन्द क्षमस्व गुरुडध्वज।
त्वमेव माता च पिता त्वमेव,
त्वमेव बन्धुश्च सखस्त्वमेव
त्वमेव विद्या द्रविणं त्वमेव,
त्वमेव सर्वं मम देव देव ।
तत्रैव गंगा यमुना चवेणी,
गोदावरी सिंधु सरस्वती च,
सर्वाणि तीर्थानि वसन्ति तत्र,
यत्रेच्युतोदार कथा प्रसंगा।
नमामि नारायण पादपंकजं

करोमि नारायण पूजनं सदा।
वदामि नारायण नाम निर्मलं,
स्मरामि नारायण तत्वम् अव्ययम्।
गो कोटिदानं ग्रहणेषु, काशी,
प्रयागं गंगाऽयुतकल्पवासः।
यज्ञायतं मेरु सुवर्णदानं,
गोविंदनाम्ना न कदापि तुल्यम्।।
ध्येयः सदा सवितृमण्डल मध्यवर्ती
नारायणः सरसिजासन-सन्निविष्ठः।
केयूरवान-कनक-कुण्डलवान्-किरीटी
हारी हिरण्य-वपुर्धृत शङ्खचक्रः।8।
करार बिन्देन पदारबिन्दं
मुखारबिन्दं विनिवेश्ययन्तं।
अश्वत्थपत्रस्य पुटेशन,
बालं मुकन्दं मनसा स्मारामि।
गोविन्द गोविन्द हरे मुरारे,
गोविन्द गोविन्द रथांगपाणे।
गोविन्द गोविन्द मुकुंद कृष्ण,
गोविन्द गोविन्द नमो नमस्ते।

विष्णु स्तुतिः

जय नारायण, जय पुरुषोत्तम, जय वामन कंसारे।
उद्धर मामसुरेशविनाशिन् पतितोहं संसारे।।
घोरं हर मम नरक रिपो, केशव कल्मषभारं।

माम्-अनुकम्पय दीनम्-अनाथं, कुरु भव-सागरपारम्।।
घोरं हर मम नरक रिपो, केशव कल्मषभारं।
जय जय देव जया-सुरसूदन, जय केशव जय विष्णो।
जय लक्ष्मीमुख-कमल-मधुव्रत, जय दशकन्धर जिष्णो।
घोरं हर मम नरक रिपो, केशव कल्मषभारं।
यद्यपि सकलम्-अहं कलयामि हरे, नहि किम्-अपि स सत्वम्।
तत्-अपि न मुञ्चति माम्-इदम्-अच्युत, पुत्रकलत्र-ममत्वं।
घोरं हर मम नरक रिपो, केशव कल्मषभारं।
पुनर्-अपि जननं पुनर्-अपि मरणं, पुनर्-अपि गर्भ-निवासम्।
सोढुम्-अलं-पुनर्-अस्मिन्-माधव, माम्-उद्धर निजदासम्।
घोरं हर मम नरक रिपो, केशव कल्मषभारं।
त्वं जननी जनकः प्रभुर्-अच्युत, त्वं सुहृत्-कुलमित्रम्।
त्वं शरणं शरणा-गतवत्सल, त्वं भव-जलधि-वहित्रं
घोरं हर मम नरक रिपो, केशव कल्मषभारं।
जनक-सुता-पति-चरण-परायण, शंकर-मुनिवर-गीतं।
धारय मनसि कृष्ण-पुरुषोतम, वारय संसृति-भीतिम्।।
घोरं हर मम नरक रिपो, केशव कल्मषभारं।

कृष्णं वन्देजगत्-गुरुम्

ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं,
व्यासेन ग्रथितां पुराण-मुनिना मध्ये महाभारतम्।
अद्वैतामृत-वर्षिणीं भगवतीम्-अष्टादशा-ध्यायिनीम्,
अम्बत्वाम्-अनुसन्दधामि भगवत्-गीते भव-द्वेषिणीम्।

नमोस्तु ते व्यास विशालबुद्धे फुल्लारविंदा-यतपत्र-नेत्र।
येन त्वया भारत-तैल-पूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः।
प्रपन्न-पारिजाताय तोत्र-वेत्रैक-पाणये।
ज्ञानमुद्राय कृष्णाय गीतामृत-दुहे नमः।
सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।
वसुदेव सुतं देवं कंसचाणूर-मर्दनम्।
देवकी परमानन्दं कृष्णं वन्दे जगत्-गुरुम्।
भीष्मद्रोणतटा जयत्रथ-जला गान्धर-नीलोत्पला,
शल्य-ग्राहवती कृपेण वहनी कर्णेन वेलाकुला।
अश्वत्थाम-विकर्ण-घोर-मकरा दुर्योधना-वर्तिनी,
सोत्तीर्णा खलुपाण्डवैः रणनदी कैवर्तके केशवः।
पाराशर्यवचः सरोजं-अमलं, गीतार्थ-गन्धोत्कटं
नानाख्यानक-केशरं-हरिकथा, सम्बोधना बोधितम्।
लोके सज्जन-षट्पदैर्-अहर्-अहः पेपीयमानं मुदा,
भूयात्-भारत-पंकजं, कलिमल-प्रध्वंसिनः श्रेयसे।
मूकं करोति वाचालं पंङ्गुं लङ्घयते गिरिं।
यत्कृपा तमहं वन्दे परमानन्द-माधवम्।
यं ब्रह्मा वरुणेन्द्र रुद्रमरुतः स्तुन्चन्ति दिव्यैः स्तवै-
र्वेदैः साँगपद-क्रमोप-निषदै-र्गायन्ति यं सामगाः।
ध्यानावस्थित-तद्गतेन मनसा पश्यन्ति यं योगिनो,
यस्यान्तं न विदुः सुरा-सुर-गणा देवाय तस्मै नमः।।

अष्टादश श्लोकी गीता

निमित्तानि च पश्यामि-विपरीतानि केशव,
न च श्रेयो-नुपश्यामि हत्वा स्वजनम्-आहवे।
योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय।
सिद्ध्य-सिद्ध्-योः समो भूत्वा समत्वं योग उच्यते।
कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्,
इद्रियार्थान्-विमूढात्मा मिथ्याचारः स उच्यते।
श्रद्धावान्-लभते ज्ञानं तत्-परः संयतेन्द्रियः,
ज्ञानं लब्ध्वा परां शान्तिम्-अचिरेणाधिगच्छति।
यतेन्द्रिय मनो बुद्धि-र्मुनि-मोक्ष-परायणः,
विगतेच्छा-भय क्रोधो-यः सदा मुक्त एव सः।
युक्ताहार-विहारस्य युक्त-चेष्टस्य कुर्मसु,
युक्त-स्वप्ना-व बोधस्य योगो भवति दुःखहा।
दैवी ह्येषा गुणमयी मम माया दुरत्यया,
मामेव ये प्रपद्यन्ते मायाम्-एतां-तरन्ति-ते।
अग्निर्-ज्योतिर्-अहः शुक्लः षण्मासा उत्तरायणम्,
तत्रो प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः।
अपि चेत्-सुदुराचारो भजते माम्-अनन्यभाक्,
साधुर्-एव स मन्तव्यः सम्यक्-व्यव-सितोहि-सः।
यो माम्-अजम्-अनादिम्-च वेत्ति-लोक महेश्वरम्,
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते।।
मत्कर्म कृत्-मत्परमो मत्-भक्तः संघ-वर्जितः,
निर्वैरः, सर्व-भूतेषु यः स मामेति पाण्डव।।

श्रेयो हि ज्ञानम्-अभ्यासात्, ज्ञानात्-ध्यानं विशिष्यते,
ध्यानात्-कर्म-फलत्याग, स्त्यागात्-शान्तिर्-अनन्तरम्।।
क्षेत्रज्ञं चापि मां विद्धि सर्व-क्षेत्रेषु भारत,
क्षेत्र-क्षेत्र ज्ञयोर्ज्ञानं-तत्-यत्-ज्ञानं मतं मम।।
मां च यो-व्यभिचारेण भक्तियोगेन सेवते,
स गुणान्-सम्-अतीत्य-तान्-ब्रह्म्-भूयाय कल्पते।।
निर्मान-मोहा जितसंग-दोषा
अध्यात्म-नित्या विनि-वृत्तकामाः,
द्वन्द्वै-र्विमुक्ता सुख दुःख संज्ञै
गच्छन्त्य मूढाः पदम्-अव्ययं तत्।।
यः शास्त्र-विधिम्-उत्सृज्य वर्तते काम-कारतः।
न स सिद्धिम्-अवाप्नोति न सुखं न परां गतिम्।।
मनः प्रसादः सौम्यत्वं मौनम्-आत्म-विनिग्रहः,
भाव-संशुद्धिर्-इत्येतत्-तपो मानसम् उच्यते।।
सर्व-धर्मान् परित्यज्य मामेकं शरणं व्रज,
अहं त्वा सर्व-पापेभ्यो मोक्ष-यिष्यामि मा-शुचः।।

सप्तश्लोकी गीता

ॐ इत्येकाक्षरं ब्रह्म, व्याहरन्-माम्-अनुस्मरन्,
यः प्रयाति त्यजन् देहं, स याति परमां गतिम्।
स्थाने हृषीकेश तव प्रकीर्त्या।
जगत्-प्रहृष्य-त्यनुरज्यते च।।

रक्षांसि भीतानि दिशो द्रवन्ति।
सर्वे नमस्यन्ति च सिद्धसंघाः।।
सर्वतः पाणिपादं तत्-सर्वतोक्षि-शिरोमुखम्,
सर्वतः श्रुतिमत्-लोके सर्वम्-आवृत्य-तिष्ठति।
कविं पुराणम्-अनुशासितारम्।
अणोरणीयांसम्-अनु-स्मरेत्-यः।।
सर्वस्य धातारम्-अचिन्त्यरूपम्।
आदित्यवर्ण तमसः परस्तात्।
उर्ध्वमूलम्-अधः-शाखम्-अश्व-त्थं प्राहुर्-अव्ययम्।
छन्दांसि-यस्य पर्णानि यस्तं वेद स वेदवित्।
सर्वस्य चाहं हृदि संनिविष्टो
मत्तः स्मृतिर्-ज्ञानम्-अपोहनं च।
वेदैश्च सर्वैर्-अहमेव वेद्यो
वेदान्त-कृत्-वेद विदेव-चाहम्।
मन्मना-भव-मत्-भक्तो मत्-याजी मां नमस्कुरु।
मामे-वैष्यसि युक्त्वैवम्-आत्मानं मत्-परायणः।।

वन्दे महापुरुष ते चरणारबिन्दम्

ध्येयं सदा परिभवघ्नं-अभीष्टदोहं,
तीर्थास्पदं शिव-विरिञ्चि-नुतं शरण्यम्।

भृत्यार्तिहं प्रणतपाल ! भवाब्धिपोतं,
वन्दे-महापुरुष ! ते चरणारबिन्दम्।
त्यक्त्वा सुदुस्त्यज-सुरेप्सित-राज्यलक्ष्मीं,
धर्मिष्ठ-आर्य-वचसा यत्-अगात्-अरण्यम्।
मायामृगं दयित-येप्सितं-अनुधावत्,
वन्दे महापुरुष ! ते चरणारबिन्दम्।
श्रीमत्-सरोरुह-यवाँकुश-चक्रचाप,
मत्स्या-ङ्कितं नव-विल्लोहित-पल्लवाभम्।।
लक्ष्म्यालयं परममंगलं-आत्मरूपं,
वन्दे महापुरुष ! ते चरणारबिन्दम्।
वृन्दावनान्तरं-अगात्-अनुगोकुलानां,
संचार्य सर्वपशुभिः स्वविवृद्ध-कामी।
संचिन्तयत्-अगगुरो-मृगपक्षिणां यत्,
वन्दे महापुरुष ! ते चरणार बिन्दम्।
यत्-गोपिका-विरह-जाग्नि परीतदेहाः,
तप्तस्तनेषु विजहुः परिरभ्य तापम्।
रासे तदीय कुच-कुँकम-पङ्कलिप्तं,
वन्दे महापुरुष ! ते चरणारबिन्दम्।
कालीय-मस्तक-विघटन-दक्षम्-अस्य,
मोक्षेप्सुभि-र्विरहदीन-मुखाभिर्-आरात्।
तत्-पत्निभिः स्तुतम्-शेष-निकामरूपं,
वन्दे महापुरुष ! ते चरणारबिन्दम्।
ज्ञानालयं श्रुतिविमृग्यं-अनादिम्-अर्च्यम्,

ब्रह्मादिभि र्हृदि-विचन्त्यं-अगाध-बोधैः।
संसार-कूप-पतितो-त्तरणाव-लम्बम्,
वन्दे महापुरुष ! ते चरणारबिन्दम्।
येनाङ्क-बालवपुषः स्तनपान-बुद्धेः,
त्वत्-अँघ्रिणा-हृतमऽनो विपरीत चक्रम्।
विध्वस्त-भाण्डम्-अपतत् भुवि गोपमूर्ते,
वन्दे महापुरुष ! ते चरणारबिन्दम्।
इत्यष्टकं पठति यः परमस्य पुंसो,
नारायणस्य निरयार्णव-तारणस्य।
सर्वाप्तिमाशु-हृदये कुरुते मनुष्यः,
संप्राप्य-देहविलयं लभते च मोक्षम्।

प्रातः स्मरण मंगलस्तोत्रम्

उत्तिष्ठो-त्तिष्ठ गोविन्द, उत्तिष्ठ गरुड़-ध्वज,
उत्तिष्ठ-कमलाकान्त, त्रौलोक्ये मंगलं कुरु ।
मंगलं भगवान् विष्णुः, मंगलं गरुड-ध्वजः,
मंगलं पुण्डरीकाक्षः मंगलायतनं हरिः ।
मूकं करोति वाचालं पंगुं लंघयते गिरिम्,
यत् कृपा तम्-अहं वन्दे, परमानन्द-माधवम् ।
नमो ब्रह्मण्य-देवाय, ग्रोब्रह्मण-हिताय च,
जगत्-हिताय कृष्णाय, गोविन्दाय नमोनमः ।
कृष्णाय वासुदेवाय, देवकी-नन्दनाय च,
नन्द गोपकुमाराय, गोविन्दाय नमो नमः ।

त्वमेव माता च पिता त्वमेव,

त्वमेव बन्धुश्च सखा त्वम्-एव,

त्वमेव विद्या द्रविणं त्वमेव,

त्वमेव सर्वं मम देव देव ।

अच्युताष्टकम्

अच्युतं केशवं रामनारायणं,

कृष्णदामोदरं वासुदेवं हरिम्।

श्रीधरं माधवं गोपिका वल्लभं,

जानकी नायकं रामचन्द्रं भजे।।

अच्युतं केशवं सत्य-भा-माधवं,

माधवं, श्रीधरं राधिकाऽराधितम्।

इन्दिरा मन्दिरं चेतसा सुन्दरं,

देवकी नन्दनं नन्दनं सन्दधे।।

विष्णवे जिष्णवे शंखिने चक्रिणे,

रुक्मिणी रागिणे जानकी जानये।

वल्लवी-वल्लभा-याऽर्चिता-यात्मने,

कंस-विध्वंसिने-वंशिने-ते-नमः।।

कृष्ण गोविन्द हे राम नारायण,

श्रीपते वासुदेवाजित श्रीनिधे।

अच्युतानन्त हे माध्वाधोक्षज,

द्वारका नायक द्रौपदी रक्षक।।

राक्षस-क्षोभितः-सीतया-शोभितो,

दण्डकारण्य-भू-पुण्यता-कारणः।

लक्ष्मणेनाऽन्वितो-वानरैः-सेवितो

गस्त्य-सम्पूजितो- राघवः-पातु-माम्।।

धेनुकारिष्टको-ऽनिष्टकृत्-द्वेषिणां,

केशिहा-कंसहृत्-वंशिका-वादिकः।

पूतना कोपकः सूरजा खेलनो,

बाल गोपालकः पातु मां सर्वदा।।

विद्युत-द्योतवान्-प्रस्फुरत्-वाससं,

प्रावृडम्-भोदवत्-प्रोल्लसत्-विग्रहम्।

वन्यया मालया शोभितोरः स्थलं,

लोहितांघ्रिद्वयं वारिजाक्षं भजे।।

कुञ्चितैः-कुन्तलैः-भ्राजमा-नानं,

रत्न-मौलिं-लसत्-कुण्डले-गण्डयोः।

हारकेयूरकं-कंकण-प्रोज्ज्वलं,

किंकिणीं-अंजुलं-श्यामलं-तं-भजे।।

अच्युतस्याष्टकं-यः-पठेत्-इष्टदं,

प्रेमतः-प्रत्यहं-पूरुषः-सस्पृहम्।

वृत्ततः सुन्दरं कर्तृ विश्वम्भरं

तस्य वश्यो हरिर्जायते सत्त्वरम्।।

गोविन्दं भज गोविन्दं

दिनमपि रजनी सायं प्रातः
शिशिर वसन्तौ पुनर् आयातः।
कालः क्रीडति गच्छति-आयु
तदपि न मुञ्चति-आशावायुः।।
भज गोविन्दं, भज गोविन्दं,
भज गोविन्दं मूढमते।
प्राप्ते सन्निहिते मरणे
नहि नहि रक्षति डुकृञ-करणे।
अग्रे वह्निः पृष्ठे भानू
रात्रौ चिबुक-समर्पित जानुः
करतल भिक्षा तरु तल वासः,
तदपि न मुञ्चति-आशा-पाशः।।
भज गोविन्दं, भज गोविन्दं,
भज गोविन्दं मूढमते।
यावत्-वित्तोपार्जन-सक्तः
तावत् निज-परिवारो रक्तः।
पश्चात्-धावति-जर्जर-गेहे
वार्ता पृच्छति कोऽपि न गेहे।
भज गोविन्दं, भज गोविन्दं,
भज गोविन्दं, मूढमते।
जटिलो मुण्डी लुञ्चित-केशः,
काषायाम्बर-बहु कृत वेषः।

पश्यन्नपि च न पश्यति मूढ,
उदर-निमित्तं-बहु कृत वेषः।
भज गोविन्दं, भज गोविन्दं,
भज गोविन्दं, मूढमते।
भगवत्-गीता-किञ्चित्-अधीता,
गङ्गा-जल-लव-कणिका पीता।
सकृदपि यस्य मुरारि-समर्चा,
तस्य यमः किं कुरुते चर्चा।
भज गोविन्दं, भज गोविन्दं,
भज गोविन्दं, मूढमते।
अङ्गं गलितं पलितं मुण्ड़ं,
दशनविहीनं-जातं-तुण्डम्।
वृद्धो याति गृहीत्वा दण्डं,
तदपि न मुञ्चति-आशा-पिण्डम्।
भज गोविन्दं, भज गोविन्दं,
भज गोविन्दं, मूढमते।
बालः-तावत्-क्रीडा-सक्तः,
तरुणःतावत्-तरुणी-रक्तः।
वृद्धः-तावत्-चिन्ता-मग्नः,
परमे-ब्रह्मणि-कोऽपि-न-लग्नः।
भज गोविन्दं, भज गोविन्दं,
भज गोविन्दं, मूढमते।
पुनरपि-जननं-पुनरपि-मरणं,
पुनरपि-जननी-जठरे-शयनम्।

इह संसारे-खलु-दुस्तारे,
कृपयाऽ पारे-पाहि-मुरारे।
भज गोविन्दं, भज गोविन्दं,
भज गोविन्दं मूढमते।

पुनरपि-रजनी-पुनरपि-दिवसः,
पुनरपि-पक्षः-पुनरपि-मासः।
पुनरपि-अयनं-पुनरपि-वर्षं,
तदपि-न-मुञ्चति-आशा-मर्षम्।
भज गोविन्दं, भज गोविन्दं,
भज गोविन्दं मूढमते।

वयसि-गते-कः-कामविकारः,
शुष्के-नीरे-कः-कासारः।
नष्टे-द्रव्ये-कः-परिवारो,
ज्ञाते-तत्त्वे-कः-संसारः।
भज गोविन्दं, भज गोविन्दं,
भज गोविन्दं मूढमते।

नारीस्तन भर-नाभि निवेशं,
मिथ्या-माया-मोहा-वेशम्।
एतत्-मांस-वसादि-विकारं,
मनसि-विचारय-बारम्-बारम्।
भज गोविन्दं, भज गोविन्दं,

भज गोविन्दं मूढमते।

कः-त्वं-कोऽहं-कुत-आयातः,

का-मे-जननी-को-मे-तातः।

इति-परि-भावय-सर्वम्-असारं,

विश्वं-त्यक्त्वा-स्वप्न-विचारम्।

भज गोविन्दं, भज गोविन्दं,

भज गोविन्दं मूढमते।

गेयं-गीता-नाम-सहस्रं,

ध्येयं-श्री-पति-रूपं-अजस्रम्।

नेयं-सज्जन-सङ्गे-चितं,

देयं-दीन-जनाय-च-वित्तम्।

भज गोविन्दं, भज गोविन्दं,

भज गोविन्दं मूढमते।

यावत्-जीवो-निवसति-देहे,

कुशलं-तावत्-पृच्छति-गेहे।

गत-वति-वायौ-देहापाये,

भार्या-बिभ्यति-तस्मिन्-काये।

भज गोविन्दं, भज गोविन्दं,

भज गोविन्दं मूढमते।

सुखतः-क्रियते-रामा-भोगः,

पश्चात्-हन्त-शरीरे-रोगः।

यद्यपि-लोके-मरणं-शरणं,

तदपि-न-मुञ्चति-पापा-चरणम्
भज गोविन्दं, भज गोविन्दं,
भज गोविन्दं मूढमते।
कुरुते-गङ्गा-सागर-गमनं,
व्रत-परि-पालनम्-अथवा-दानम्।
ज्ञान-विहीनः-सर्व मतेन,
मुक्तिः-न-भवति-जन्मशतेन
भज गोविन्दं भज गोविन्दं,
भज गोविन्दं मूढमते।

श्री कृष्ण स्तोत्राणि

गोविन्दाष्टकम्

चिदानन्दाकारं श्रुतिसरससारं समरसं
निराधाराधारं भवजलधिपारं परगुणम्।
रमाग्रीवाहारं व्रजवनविहारं हरनुतं
सदा तं गोविन्दं परमसुखकन्दं भजत रे।।
महाम्भोधिस्थानं स्थिरचरनिदानं दिविजपं
सुधाधारापानं विहगपतियानं यमरतम्।
मनोज्ञं सुज्ञानं मुनिजननिधानं ध्रुवपदं।
सदा तं गोविन्दं परमसुखकन्दं भजत रे।।
धिया धीरैर्ध्येयं श्रवणपुटपेयं यतिवरै
र्महावाक्यैर्ज्ञेयं त्रिभुवनविधेयं विधिपरम्।
मनोमानामेयं सपदि हृदि नेयं नवतनुं।

सदा तं गोविन्दं परमसुखकन्दं भजत रे।।
महामायाजालं विमलवनमालं मलहरं
सुभालं गोपालं निहतशिशुपालं शशिमुखम्।
कलातीतं कालं गतिहतमरालं भुररिपुं।
सदा तं गोविन्दं परमसुखकन्दं भजत रे।।
नभोबिम्बस्फीतं निगमगणगीतं समगतिं
सुरौघैः सम्प्रीतं दितिजविपरीतं पुरिशयम्।
गिरां मार्गातीतं स्वदितनवनीतं नयकरं।
सदा तं गोविन्दं परमसुखकन्दं भजत रे।।
परेशं पद्मेशं शिवकमलजेशं शिवकरं
द्विजेशं देवेशं तनुकुटिलकेशं कलिहरम्।
खगेशं नागेशं निखिलभुवनेशं नगधरं।
सदा तं गोविन्दं परमसुखकन्दं भजत रे।।
रमाकान्तं कान्तं भवभयभयान्तं भवसुखं
दुराशान्तं शान्तं निखिलहृदि भान्तं भुवनपम्।
विवादान्तं दान्तं दनुजनिचयान्तं सुचरितं।
सदा तं गोविन्दं परमसुखकन्दं भजत रे।।
जगज्ज्येष्ठं श्रेष्ठं सुरपतिकनिष्ठं क्रतुपतिं
बलिष्ठं भूयिष्ठं त्रिभुवनवरिष्ठं वरवहम्।
स्वनिष्ठं धर्मिष्ठं गुरुगुणगरिष्ठं गुरुवरं।
सदा तं गोविन्दं परमसुखकन्दं भजत रे।।
गदापाणेरेतद्दुरितदलनं दुःखशमनं
विशुद्धात्मा स्तोत्रं पठति मनुजो यस्तु सततम्।

स भुक्त्वा भोगौघं चिरमिह ततोऽपास्तवृजिनः
परं विष्णोः स्थानं व्रजति खलु वैकुण्ठभुवनम्।।

श्रीराम स्तुतिः

सुग्रीवमित्रं परमं पवित्रं, सीताकलत्रं नवमेघ-गात्रम्।
कारुण्य-पात्रं शतपत्र-नेत्रं, श्रीराम-चन्द्रं सततं नमामि।
संसार-सारं निगम-प्रचारं-धर्मावतारं हृतभूमि-भारम्।
सदाविकारं सुखसिन्धु-सारं-श्रीराम-चन्द्रं सततंनमामि।
लक्ष्मो-विलासं जगतां निवासं-लंकाविनाशं भुवन-प्रकाशम्।
भू-देव-वासं शरत्-इन्दुहासं-श्रीरामचन्द्रं सततं नमामि।
मन्दार-मालं-वचने रसालं-गुणैर्विशालं हत-सप्त-तालम्
क्रव्याद-कालं सुर-लोकपालं-श्रीरामचन्द्रं सततं नमामि।
वेदान्त-गानं सकलैः समानं - हतारि-मानं-त्रिदश-प्रधानम्।
गजेन्द्र-यानं विगतावसानं-श्रीरामचन्द्रं सततं नमामि।
श्यामाभि-रामं नयना-भिरामं, गुणाभिरामं, वचनाभिरामम्।
विश्व-प्रणामं कृतभक्तकामं, श्रीरामचन्द्रं सततं नमामि।
लीलाशरीरं रणरंगधीरं, विश्वैकसारं रघुवंश-हारम्।
गम्भीरनादं जितसर्व-वादं, श्रीरामचन्द्र सततं नमामि।
खले कृतान्तं स्वजने विनीतं-सामोपगीतं मनसाऽप्रीततम्।
रोगाणगीतं वचनात्-अतीतं-श्रीरामचन्द्रं सततं नमामि।

हरे राम हरे राम राम राम हरे हरे।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे।

श्री हनूमते नमः

श्री हनुमान चालीसा

दोहा

श्री गुरु चरन सरोज रज, निज मन मुकुरू सुधारि।
बरनऊँ रघुबर बिमल जसु, जो दायकु फल चारि।।
बुद्धिहीन तनु जानिके, सुमिरौं पवन-कुमार।
बल बुद्धि विद्या देहु मोहि, हरहु कलेस विकार।।

चौपाई

जय हनुमान ज्ञान गुन सागर।
जय कपीस तिहुँ लोक उजागर।।
राम दूत अतुलित बल धामा।
अंजनि - पुत्र पवन सुत नामा।।
महावीर विक्रम बजरंगी ।
कुमति निवार सुमति के संगी ।।
कंचन बरन बिराज सुबेसा ।
कानन कुण्डल कुंचित केसा ।।
हाथ बज्र और ध्वजा बिराजै ।
काँधे मूँज जनेऊ साजै ।।
संकर सुवन केसरी नन्दन ।
तेज प्रताप महा जग बन्दन ।।
विद्यावान गुनी अति चातुर ।
राज काज करिबे को आतुर ।।
प्रभु चरित्र सुनिबे को रसिया ।
राम लखन सीता मन बसिया ।।

सूक्ष्म रूप धरि सियहिं दिखावा ।
बिकट रूप धरि लंक जरावा ।।
भीम रूप धरि असुर सँहारे ।
रामचन्द्र के काज सँवारे ।।
लाय सजीवन लखन जियाये ।
श्री रघुबीर हरषि उर लाये ।।
रघुपति कीन्ही बहुत बड़ाई ।
तुम मम प्रिय भरतहि सम भाई ।।
सहस बदन तुम्हरो जस गावैं ।
अस कहि श्रीपति कंठ लगावैं ।।
सनकादिक ब्रह्मादि मुनीसा ।
नारद सारद सहित अहीसा ।।
जम कुबेर दिगपाल जहाँ ते ।
कबि कोबिद कहि सके कहाँ ते ।।
तुम उपकार सुग्रीवहिं कीन्हा ।
राम मिलाय राज पद दीन्हा ।।
तुम्हरो मंत्र बिभीषन माना ।
लंकेस्वर भए सब जग जाना ।।
जुग सहस्र जोजन पर भानू ।
लील्यो ताहि मधुर फल जानू ।।
प्रभु मुद्रिका मेलि मुख माहीं ।
जलधि लाँघि गये अचरज नाहीं ।।
दुर्गम काज जगत के जेते ।
सुगम अनुग्रह तुम्हरे तेते ।।

राम दुआरे तुम रखवारे ।
होत न आज्ञा बिनु पैसारे ।।
सब सुख लहै तुम्हारी सरना ।
तुम रच्छक काहू को डर ना ।।
आपन तेज सम्हारो आपै ।
तीनों लोक हाँक तें काँपै ।।
भूत पिसाच निकट नहिं आवै ।
महाबीर जब नाम सुनावै ।।
नासै रोग हरै सब पीरा ।
जपत निरंतर हनुमत बीरा ।।
संकट तें हनुमान छुड़ावै ।
मन क्रम बचन ध्यान जो लावै ।।
सब पर राम तपस्वी राजा ।
तिन के काज सकल तुम साजा ।।
और मनोरथ जो कोइ लावै ।
सोइ अमित जीवन फल पावै ।।
चारों जुग परताप तुम्हारा ।
है परसिद्ध जगत उजियारा ।।
साधु संत के तुम रखवारे ।
असुर निकंदन राम दुलारे ।।
अष्ट सिद्धि नौ निधि के दाता ।
अस बर दीन जानकी माता ।।
राम रसायन तुम्हरे पासा ।
सदा रहो रघुपति के दासा ।।

तुम्हरे भजन राम को पावै ।
जनम जनम के दुख बिसरावै ।।
अंत काल रघुबर पुर जाई ।
जहाँ जन्म हरि-भक्त कहाई ।।
और देवता चित्त न धरई ।
हनुमत सेइ सर्ब सुख करई ।।
संकट कटै मिटै सब पीरा ।
जो सुमिरै हनुमत बलबीरा ।।
जै जै जै हनुमान गोसाईं ।
कृपा करहु गुरु देव की नाईं ।।
जो सत बार पाठ कर कोई ।
छूटहि बंदि महा सुख होई ।।
जो यह पढ़ै हनुमान चलीसा ।
होय सिद्धि साखी गौरीसा ।।
तुलसीदास सदा हरि चेरा ।
कीजै नाथ हृदय महँ डेरा ।।

दोहा

पवनतनय संकट हरन, मंगल मूरति रूप ।
राम लखन सीता सहित, हृदय बसहु सुर भूप।।

संकटमोचन हनुमानाष्टक

बाल समय रवि भक्षि लियो तब, तीनहुँ लोक भयो अँधियारो ।
ताहि सों त्रास भयो जग को यह संकट काहु सों जात न टारो।
देवन आनि करी बिनती तब छाँड़ि दियो रबि कष्ट निवारो।

को नहिं जानत है जगमें कपि संकटमोचन नाम तिहारो।
बालि की त्रास कपीस बसै गिरि जात महाप्रभु पंथ निहारो ।
चौंकि महा मुनि साप दियो तब चाहिय कौन बिचार बिचारो।
कै द्विज रूप लिवाय महाप्रभु सो तुम दास के सोक निवारो।
अंगद के सँग लेन गये सिय खोज कपीस यह बैन उचारो ।
जीवत ना बचिहौ हम सो जु बिना सुधि लाए इहाँ पगु धारो।
हेरि थके तट सिंधु सबै तब लाय सिया-सुधि प्रान उबारो।
रावण त्रास दई सिय को सब राक्षसि सों कहि सोक निवारो।
ताहि समय हनुमान महाप्रभु जाय महा रजनीचर मारो।
चाहत सीय असोक सों आगि सु दै प्रभु मुद्रिका सोक निवारो।
बान लग्यो उर लछिमन के तब प्रान तजे सुत रावन मारो ।
लै गृह बैद्य सुषेन समेत तबै गिरि द्रोन सु बीर उपारो ।।
आनि सजीवन हाथ दई तब लछिमन के तुम प्रान उबारो।
रावन जुद्ध अजान कियो तब नाग कि फाँस सबै सिर डारो ।
श्रीरघुनाथ समेत सबै दल मोह भयो यह संकट भारो ।
आनि खगेस तबै हनुमान जु बंधन काटि सुत्रास निवारो।
बंधु समेत जबै अहिरावन लै रघुनाथ पताल सिधारो ।
देबिहिं पूजि भली बिधि सों बलि देउ सबै मिलि मंत्र बिचारो ।
जाय सहाय भयो तब ही अहिरावन सैन्य समेत सँहारो।
काज किये बड़ देवन के तुम बीर महाप्रभु देखि बिचारो ।
कौन सो संकट मोर गरीब को जो तुमसों नहिं जात है टारो ।
बेगि हरो हनुमान महाप्रभु जो कछु संकट होय हमारो ।।

दोहा

लाल देह लाली लसे, अरु धरि लाल लँगूर।
बज्र देह दानव दलन, जय जय जय कपि सूर।।

श्री हनुमान जी की आरती

आरती कीजै हनुमान लला की,
दुष्टदलन रघुनाथ कला की।
जाके बल से गिरिवर काँपै,
रोग-दोष जाके निकट न झाँकै।
अंजनि पुत्र महा बलदाई,
संतन के प्रभु सदा सहाई।
दे बीरा रघुनाथ पठाये,
लंका जारि सिया सुधि लाये।
लंका सो कोट समुद्र सी खाई,
जात पवनसुत बार न लाई।
लंका जारि असुर संहारे,
सीयारामजी के काज सँवारे।
लक्ष्मण मूर्छित पड़े सकारे,
आनि सजीवन प्रान उबारे।
पैठि पताल तोरि जमकारे,
अहिरावन की भुजा उखारे।
बायें भुजा असुर दल मारे,
दहिने भुजा संतजन तारे।
सुर नर मुनि आरती उतारें,
जै जै जै हनुमान उचारें।
कंचन थार कपूर लौ छाई,
आरती करत अंजना माई।

जो हनुमान जी की आरति गावै।
बसि बैकुंठ परमपद पावै।
लंक विध्वंस कीन्ह रघुराई,
तुलसीदास प्रभु कीरति गाई।

श्री राम वन्दना

आपदामपहर्तारं दातारं सर्वसम्पदाम्।
लोकाभिरामं श्री रामं भूयो भूयो नमाम्यहम्।।
रामाय रामभद्राय रामचन्द्राय मानसे।
रघुनाथाय नाथाय सीतायाः पतये नमः।।
नीलाम्बुज श्यामल कोमलाङ्गं।
सीता समारोपित वामभागम्।।
पाणौ महासायक चारु चापं।
नमामि रामं रघुवंशनाथम्।।

श्री राम स्तुति

श्रीरामचन्द्र कृपालु भजु मन हरण भवभय दारुणं।
नवकंज-लोचन, कंज-मुख, कर-कंज पद कंजारुणं।।
कंदर्प अगणित अमित छबि, नवनील-नीरद सुंदरं।
पट पीत मानहु तड़ित रुचि शुचि नौमि जनक सुताबरं।।
भजु दीनबंधु दिनेश दानव-दैत्यवंश-निकंदनं।
रघुनंद आनँदकंद कौशलचंद दशरथ-नंदनं।।
सिर मुकुट कंडल तिलक चारु उदारु अंग विभूषणं।
आजानुभुज शर-चाप-धर, संग्राम-जिल-खरदूषणं।।

इति वदति तुलसीदास शंकर-शेष-मुनि-मन-रंजनं।
मम हृदय-कंज निवास कुरु, कामादि खलदल-गंजनं।
मनु जाहिं राचेउ मिलिहि सो बरु सहज सुंदर साँवरो।
करुना निधान सुजान सीलु सनेहु जानत रावरो।।
एति भाँति गौरि असीम सुनि सिय सहित हियँ हरषीं अली।
तुलसी भवानिहि पूजि पुनि पुनि मुदित मन मंदिर चली।।

श्री रामावतार

भए प्रगट कृपाला दीनदयाला कौसल्या हितकारी।
हरिषत महतारी मुनि मन हारी अद्भुत रूप बिचारी।।
लोचन अभिरामा तनु घनस्यामा निज आयुध भुज चारी।
भूषन बनमाला नयन बिसाला सोभासिंधु खरारी।।
कह दुइ कर जोरी अस्तुति तोरी केहि बिधि करौं अतंता।
माया गुन ग्यानातीत अमाना बेद पुरान भनंता।।
करुना सुखसागर सब गुन आगर जेहि गावहिं श्रुति संता।
सो मम हिम लागी जन अनुरागी भयउ प्रगट श्रीकंता।।
ब्रह्मांड निकाया निर्मित माया रोम रोम प्रति बेद कहै।
मम उर सो बासी यह उपहासी सुनत धीर मति थिर न रहै।
उपजा जब ग्याना प्रभु मुसुकाना चरित बहुत बिधि कीन्ह चहै।
कहि कथा सुहाई मातु बुझाई जेहि प्रकार सुत प्रेम लहै।।
माता पुनि बोली सो मति डोली तजहु तात यह रूपा।
कीजै सिसुलाला अति प्रियसीला यह सुख परम अनूपा।।
सुनि बचन सुजाना रोदन ठाना होइ बालक सुरभूपा।

यह चरित जे गावहिं हरिपद पावहिं ते न परहिं भवकूपा।।

हरे राम हरे राम राम राम हरे हरे

हरे राम हरे राम राम राम हरे हरे

श्री राम चन्द्र स्तुति

नमामि भक्तवत्सलं कृपालु शील कोमलं

भजामि ते पदांबुजं अकामिनां स्वधामदं।

निकाम श्याम सुंदरं भवांबुनाथ मन्दरं

प्रफुल्ल कंज लोचनं मदादि दोष मोचनं।।

प्रलंब बाहु विक्रमं प्रभोऽप्रमेय वैभवं

निषंग चाप सायकं धरं त्रिलोक नायकं।

दिनेश वंश मंडनं महेश चाप खंडनं

मुनींद्र संत रंजनं सुरारि वृंद भंजनं।।

मनोज वैरि वंदितं अजादि देव सेवितं

विशुद्ध बोध विग्रहं समस्त दूषणापहं।

नमामि इंदिरा पतिं सुखाकरं सतां गतिं

भजे सशक्ति सानुजं शची पति प्रियानुजं।।

त्वदंघ्रि मूल ये नराः भजन्ति हीन मत्सराः

पतंति नो भवार्णवे वितर्क वीचि संकुले।

विविक्त वासिनः सदा भजंति मुक्तये मुदा

निरस्य इंद्रियादिकं प्रयांति ते गतिं स्वकं।।

तमेकमद्भुतं प्रभुं निरीहमीश्वरं विभुं

जगद्गुरुं च शाश्वतं तुरीयमेव केवलं।

भजामि भव वल्लभं कुयोगिनां सुदुर्लभं

स्वभक्त कल्प पादपं समं सुसेव्यमन्वहं।।
अनूप रूप भूपतिं नतोऽहमुर्विजा पतिं
प्रसीद मे नमामि ते पदाब्ज भक्ति देहि मे।
पठंति ये स्तवं इदं नरादरेण ते पदं
व्रजंति नात्र संशयं त्वदीय भक्ति संयुताः।।

मधुराष्टकम्

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम्।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम्।।
वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम्।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम्।।
वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम्।।
गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम्।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम्।
करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम्।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम्।।
गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम्।।
गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम्।
दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम्।।
गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम्।।

इति श्रीमद्वल्लभाचार्यकृतं मधुराष्टकं सम्पूर्णम्।

रामरक्षास्तोत्रम्

'रामरक्षाकवच' की सिद्धिकी विधि

नवरात्रमें प्रतिदिन नौ दिनों तक ब्राह्म-मुहूर्त में नित्य-कर्म तथा स्नानादि से निवृत्त हो शुद्ध वस्त्र धारणकर कुशा के आसन पर बैठ जाइये। भगवान् श्रीराम के कल्याणकारी स्वरूप में चित्तको एकाग्र करके इस महान् फलदायी स्तोत्र का कम-से-कम ग्यारह बार और यदि यह न हो सके तो सात बार नियमित रूप से प्रतिदिन पाठ कीजिये। वैसे 'रामरक्षाकवच' कुछ लंबा है, पर इस संक्षिप्त रूप से भी काम चल सकता है। पूर्ण शान्ति और विश्वास से इसका जाप होना चाहिये, यहाँ तक कि यह कण्ठस्थ हो जाय।

विनियोगः

अस्य श्रीरामरक्षास्तोत्रमन्त्रस्य बुधकौशिक ऋषिः श्रीसीतारामचन्द्रो देवता अनुष्टुप छन्दः सीता शक्तिः श्रीमान् हनुमान् कीलकं श्रीरामचन्द्रप्रीत्यर्थे रामरक्षा-स्तोत्रजपे विनियोगः।

ध्यानम्

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं
पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम्।
वामाङ्कारूढसीतामुखकमलमिलल्लोचनं नीरदाभं
नानालंकारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम्।।

स्तोत्रम्

चरितं रघुनाथस्य शतकोटिप्रविस्तरम्।
एकैकमक्षरं पुंसां महापातकनाशनम् ।।1।।
ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम्।
जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम् ।।2।।

सासितूणधनुर्बाणपाणिं नक्तंचरान्तकम्।
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् ।।3।।
रामरक्षां पठेत् प्राज्ञः पापघ्नीं सर्वकामदाम्।
शिरो मे राघवः पातु भालं दशरथात्मजः ।।4।।
कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ।।5।।
जिह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः।
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः ।।6।।
करौ सीतापतिः पातु हृदयं जामदग्न्यजित्।
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः ।।7।।
सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः ।
उरू रघूत्तमः पातु रक्षःकुलविनाशकृत् ।।8।।
जानुनी सेतुकृत् पातु जङ्घे दशमुखान्तकः।
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः ।।9।।
एतां रामबलोपेतां रक्षां यः सुकृती पठेत्।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ।।10।।
पाताल-भूतलव्योमचारिणश्छद्मचारिणः।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ।।11।।
रामेति रामभद्रेति रामचन्द्रेति वा स्मरन्।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति ।।12।।
जगज्जैत्रेकमन्त्रेण रामनाम्नाभिरक्षितम्।
यःकण्ठे धारयेत्तस्य करस्थाः सर्वसिद्धयः ।।13।।
वज्रपञ्जरनामेदं यो रामकवचं स्मरेत्।

अव्याहताज्ञः सर्वत्र लभते जयमङ्गलम् ॥14॥
आदिष्टवान् यथा स्वप्ने रामरक्षामिमां हरः।
तथा लिखितवान् प्रातः प्रबुद्धो बुधकौशिकः ॥15॥
आरामः कल्पवृक्षाणां विरामः सकलापदाम्।
अभिरामस्त्रिलोकानां रामः श्रीमान् स नः प्रभु ॥16॥
तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥17॥
फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥18॥
शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम्।
रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ॥19॥
संनद्धः कवची खड्गी चापबाणधरो युवा।
गच्छन् मनोरथान् नश्च रामः पातु सलक्ष्मणः ॥20॥
रामो दाशरथिः शूरो लक्ष्मणानुचरो बली।
काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघूत्तमः ॥21॥
वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः।
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ॥22॥
इत्येतानि जपन् नित्यं मद्भक्तः श्रद्धयान्वितः
अश्वमेधाधिकं पुण्यं सम्प्राप्नोति न संशयः ॥23॥
रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम्।
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नराः ॥24॥
रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम्।
राजेन्द्रं सत्यसंधं दशरथतनयं श्यामलं शान्तमूर्तिं।

वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम्।।25।।

रामाय रामभद्राय रामचन्द्राय वेधसे।

रघुनाथाय नाथाय सीतायाः पतये नमः ।।26।।

श्रीराम राम रघुनन्दन राम राम

श्री राम राम भरताग्रज राम राम।

श्री राम राम रणकर्कश राम राम

श्री राम राम शरणं भव राम राम ।।27।।

श्रीरामचन्द्रचरणौ मनसा स्मरामि

श्रीरामचन्द्रचरणौ वचसा गृणामि।

श्रीरामचन्द्रचरणौ शिरसा नमामि

श्रीरामचन्द्रचरणौ शरणं प्रपद्ये ।।28।।

माता रामो मत्पिता रामचन्द्रः

स्वामी रामो मत्सखा रामचन्द्रः।

सर्वस्वं मे रामचन्द्रो दयालुः

नान्यं जाने नैव जाने न जाने ।।29।।

दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा।

पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम्।।30।।

लोकाभिरामं रणरङ्गधीरं राजीवनेत्रं रघुवंशनाथम्।

कारुण्यरूपं करुणाकरं तं श्रीरामचन्द्रं शरणं प्रपद्ये।।31।।

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्।

वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ।।32।।

कूजन्तं रामरामेति मधुरं मधुराक्षरम्।

आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्।।34।।

आपदामपहर्तारं दातारं सर्वसम्पदाम्।

लोकाभिराम श्रीरामं भूयो भूयो नमाम्यहम् ।।35।।
भर्जनं भवबीजानामर्जनं सुखसम्पदाम्।
तर्जनं यमदूतानां रामरामेति गर्जनम् ।।36।।
रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ।।37।।
राम रामेति रामेति रमे रामे मनोरमे।
सहस्रनाम तत्तुल्यं रामनाम वरानने ।।38।।

।।इति श्रीबुधकौशिकमुनिविरचितं श्रीरामरक्षास्तोत्रं सम्पूर्णम्।।

गौरी स्तुतिः

ॐ लीलारब्ध-स्थापित-लुप्ताखिल-लोकां,
लोकातीतै-र्योगिभिर्-अन्तर्-हृदि-मृग्याम्।
बालादित्य-श्रेणि-समान-द्युति-पुंजां,
गौरीम्-अम्बाम्-अम्बु-रुहा-क्षीम्-अहम्-ईड्ये।।
आशा-पाश-क्लेश-विनाशं विदधानां,
पादाम्भोज-ध्यान-पराणां पुरुषाणाम्।
ईशीम्-ईशाङ् गार्ध हरां तां तनुमध्यां,
गौरीम्-अम्बाम्-अम्बु-रुहा-क्षीम्-अहम्-ईड्ये।।
प्रत्याहार-ध्यान-समाधि-स्थितिभाजां,
नित्यं चित्ते निर्वृत्तिकाष्ठां कलयन्तीम्।
सत्य-ज्ञाना-नन्दमयीं तां तडित्-आभां,
गौरीम्-अम्बाम्-अम्बु-रुहा-क्षीम्-अहम् ईड्ये।।

चन्द्रापीडा-नन्दितमन्द-स्मितवक्त्रां,
चन्द्रापीडा-लंकृत-लोला-लकभाराम्।
इन्द्रोपेन्द्रा-द्यर्चित पादाम्बुजयुग्मां,
गौरीम्-अम्बाम्-अम्बु-रुहा-क्षीम्-अहम्-ईड्ये।।
नाना कारैः शक्ति-कदम्बै-र्भुवनानि,
व्याप्त स्वैरं क्रीडति यासौ स्वयमेका।
कल्याणीं तां कल्पलताम्-आनतिभाजां,
गौरीम्-अम्बाम्-अम्बु-रुहा-क्षीम्-अहम्-ईड्ये।।
मूलाधारात्-उत्थित-वन्तीं विधिरन्ध्रं,
सौरं-चान्द्रं धाम विहाय ज्वलिताङ्गीम्।
थूलां सूक्ष्मां सूक्ष्मतरां ताम्-अभिवन्द्यां,
गौरीम् अम्बाम्-अम्बु-रुहा-क्षीम्-अहम्-ईड्ये।।
आदि-क्षान्ताम्-अक्षर मूर्त्या, विलसन्तीं,
भूते भूते भूत-कदम्बं प्रसवित्रीम्।
शब्द-ब्रह्मा-नन्द-मयीं ताम्-अभिरामां,
गौरीम्-अम्बाम्-अम्ब-रुहा-क्षीम्-अहम्-ईड्ये।।
यस्याः कुक्षौ लीनम्-अखण्ड़ं, जगत्-अण्डं,
भूयो भूयः प्रादुर्-अभूत्-अक्षतमेव।
भर्त्रा सार्धं तां स्फटिकाद्रौ, विहरन्तीम्,
गौरीम्-अम्बाम्-अम्बु-रुहा-क्षीम्-अहम्-ईड्ये।।
यस्याम्-एतत्प्रोतम्-अशेषं मणिमाला,
सूत्रे यत्-वत् क्वापि चरं चाप्यचरं च।
ताम्-अध्यात्म-ज्ञानपदव्या-गमनीयां,
गौरीम् अम्बां -अम्बु-रुहा-क्षीम्-अहम्-ईड्ये।।

नित्यः सत्यो निष्कल एको जगदीशः
साक्षी यस्याः सर्गविधौ सहंरणे च।
विश्वत्राण-क्रीडन शीलां शिवपत्नीं,
गौरीम् अम्बाम्-अम्बु-रुहा-क्षीम्-अहम्-ईड्ये।।
प्रातः काले भावविशुद्धिं विदधानो,
भक्त्या नित्यं जल्पति गौरीदशकं यः।
वाचां सिद्धिं सम्पत्तिम्-उच्चैः शिवभक्तिं,
तस्या-वश्यं पर्वत-पुत्री विदधाति।।

देवीसूक्तम्

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्।
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः।
कल्याण्यै प्रणतां वृद्ध्यै सिद्धयै कुर्मो नमो नमः।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः।
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः।
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः।
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता,
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः।।
या देवी सर्वभूतेषु चेतनेत्य-भिधीयते,

नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।।
या देवी सर्वभूतेषु निद्रारूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।।
या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।
या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।।
या देवी सर्वभूतेषु जातिरूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।।
या देवी सर्वभूतेषु लज्जारूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।।
या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।।
या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।।
या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।।
या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।।

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।।
या देवी सर्वभूतेषु दयारूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।।
या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।।
या देवी सर्वभूतेषु मातृरूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।।
या देवी सर्वभूतेषु भ्रांतिरूपेण संस्थिता,
नमस्तस्यै, नमस्तस्यै नमस्तस्यै नमोनमः।।
इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या।
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः।।
चितिरूपेण या कृत्स्नम् एतद्व्याप्य स्थिता जगत्।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।
स्तुता सुरैः पूर्वमभीष्टसंश्रया
त्तथा सुरेन्द्रेण दिनेषु सेविता।
करोतु सा नः शुभहेतुरीश्वरी,
शुभानि भद्राण्यभिहन्तु चापदः।।
या साम्प्रतं चोद्धतदैत्यतापिते,
रस्माभिरीशा च सुरैर्नमस्यते।
या च स्मृता तत्क्षणमेव हन्ति नः,
सर्वापदो भक्तिविनम्रमूर्तिभिः।।

दुर्गा सिद्ध मन्त्र स्तोत्र

देवि प्रपन्नार्तिहरे प्रसीद,
प्रसीद मातर् जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि पाहि विश्वं,
त्वमीश्वरी देवि चराचरस्य।।
त्वं वैष्णवी शक्तिरनन्तवीर्या,
विश्वस्य बीजं परमासि माया।
सम्मोहितं देवि समस्तमेतत,
त्वं वै प्रसन्ना भुवि मुक्ति हेतुः।।
विद्याः समस्तास्तव देवि भेदाः,
स्त्रियः समस्ताः सकला जगत्सु।
त्वयैकया पूरितम् अम्बयैतत्,
का ते स्तुतिः स्तव्यपरा परोक्तिः।।
विश्वेश्वरि त्वं परिपासि विश्वं,
विश्वात्मिका धारयसीति विश्वम्।
विश्वेशवन्ध्या भवती भवन्ति,
विश्वाश्रया ये त्वयि भक्ति नम्राः।।
दुर्गे स्मृता हरसि भीतिमशेष जन्तोः,
स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
द्रारिद्र्य-दुःख भय-हारिणि का त्वदन्या,
सर्वोपकार करणाय सदार्द्रचित्ता।।

सप्तश्लोकी दुर्गा

ज्ञानि-नाम्-अपि चेतांसि देवी भगवती हि सा।
बलात्-आकृष्य मोहाय महामाया प्रयच्छति
दुर्गे स्मृता हरसि भीतिम्-अशेष-जन्तोः
स्वस्थैः स्मृता मतिम्-अतीव शुभां ददासि।
दारि-द्र्य-दुःख-भय-हारिणि का त्वत्-अन्या
सर्वोप-कार-करणाय दयार्द्र-चिता।
सर्व-मंगल-मंगल्ये शिवे सर्वार्थ-साधिके,
शरण्ये त्र्यम्बके गौरि नारायणि नमोस्तुते।
शरणागत-दीनार्त-परित्राण-परायणे
सर्वस्यार्ति-हरे देवि नारायणि नमोस्तु ते ।
सर्व-स्वरूपे सर्वेशे सर्व-शक्ति-समन्विते,
भयेभ्यस्त्राहि-नो देवि दुर्गे देवि नमोस्तुते।
रोगान्-अशेषान्-अपहंसि तुष्टा
रुष्टा-तु कामान् सकलान्-अभीष्टान्
त्वाम्-आश्रितानां न विपत्-नराणां
त्वाम्-आश्रिता ह्या श्रयतां प्रयान्ति।
सर्वा-बाधा-प्रशमनं त्रैलोक्य-स्याखिलेश्वरि
एवम्-एव त्वया कार्यम्-अस्मत्-वैरि-विनाशनम्।

गायत्री चालीसा

ॐ भूर्भवः स्वः ॐ युतजननी,
गायत्री नितकलिमल दहनी।
अक्षर चौबीस परम पुनिता,
इनमें बसे शास्त्र श्रुति गीता।
शाश्वत सतोगुणी सत् रूपा,
सत्य सनातन सुधा अनूपा।
हंसारूढ सितम्बर धारी,
स्वर्णकान्ति, शुचि गगन बिहारी।
पुस्तक पुष्प कमण्डलु माला,
शुभ्र वर्ण तनु नयन विशाला।
ध्यान धरत पुलकित हियहोई,
सुख उपजल दुख दुरमति खोई।
कामधेनु तुम सुर तरु छाया,
निराकर की अद्भुत माया।
तुम्हरी शरण गहै जो कोई,
तरै सकल संकट सो सोई।
सरस्वती लक्ष्मी तुम काली,
दिपै तुम्हारी ज्योति निराली।
तुम्हरी महिमा पार न पावै,
जो शारद शत मुख गुन गावै।
चार वेद की मातु पुनीता,
तुम ब्रह्माणी गौरी सीता।
महा मन्त्र जितने जग माहीं,

कोऊ गायत्री सम नाहीं।
सुमरत हिय में ज्ञान प्रकासै,
आलस्य पाप अविद्या नासै।
सृष्टि बीज जग जननि भवानी,
कालरात्रि वरदा कल्याणी।
ब्रह्मा विष्णु रुद्र सुर जेते,
तुमसों पावें सुरता तेते।
तुम भक्तन की भक्त तुम्हारे,
जननि हिं पुत्र प्राण ते प्यारे।
महिमा अपरम्पार तुम्हारी,
जै जै जै त्रिपदा भय हारी।
पूरित सकल ज्ञान-विज्ञाना,
तुम सम अधिक न जग में आना।
तुमहि जानि कछू रहे न शेषा,
तुमहिं पाय कछू रहै न कलेषा।
जानत तुमहिं तुमहिं है जाई,
पारस परसि कुधातु सुहाई
तुम्हरी शक्ति दिपै सब ठाईं,
माता तुम सब ठौर समाई।
ग्रह नक्षत्र ब्रह्माण्ड घनेरे,
सब गतिवान् तुम्हारे प्रेरे।
सकल सृष्टि की प्राण विधाता,
पालक पोषक नाशक त्राता।
मातेश्वरी दया व्रतधारी,
तुम सम तेर पालकी भारी।

जा कर कृपा तुम्हारी होई,
ता पर कृपा करे सब कोई।
मन्द बुद्धि ते बुद्धि बल पावें,
रोगी रोग रहित है जावें।
दारिद्र मिटै कटै सब पीरा,
नासै दुख हर भव भीरा।
गृह क्लेश चित चिन्ता भारी,
नासै गायत्री भय हारी।
सन्तति हीन सुसन्तति पावें,
सुख सम्पत्ति युत मोद मनावें।
भूत पिशाच सबै भय खावें,
यम के दूत निकट नहीं आवें।
जो सधवा सुमिरैं चितलाई,
अछत सुहाग सदा सुखदाई।
घर बर सुख प्रबल हैं कुमारी,
विधवा रहें सत्य व्रत धारी।
जयति जयति जगदम्ब भवानी,
तुम सम और दयालु न दानी।
जो सद्गुरु से दीक्षा पावैं,
सो साधन को सफल बनावें।
सुमिरन करै सुरुचि बडभागी,
लहैं मनोरथ गृही विरागी।
अष्ट सिधि नव निधि की दाता,
सब समर्थ गायत्री माता।

ऋषि मुनि तपस्वी योगी,
आरत अर्थी चिन्तित भोगी।
जो जो शरण तुम्हारी आवें,
सो सो निज वांछित फल पावें।
बल विद्या शील सुभाऊ,
धन वैभव यश तेज उछाहू।
सकल बढ़ें सुख नाना,
जो यह पाठ करै धर ध्याना।
यह चालीसा भक्तियुत, पाठ करै जो कोय,
तापर कृपा प्रसन्नता, गायत्री की होय।

दुर्गास्तुति

नमस्ते शरण्ये शिवे सानुकम्पे,
नमस्ते जगद्व्यापिके विश्वरूपे।
नमस्ते जगद्वन्द्य-पादारविन्दे,
नमस्ते जगत्तारिणि त्राहि दुर्गे।।
नमस्ते जगच्चिन्त्यमानस्वरूपे,
नमस्ते महायोगिनि ज्ञानरूपे।
नमस्ते नमस्ते सदानन्दरूपे,
नमस्ते जगत्तारिणि त्राहि दुर्गे।।
अनाथस्य दीनस्य तृष्णातुरस्य,
भयार्तस्य भीतस्य बद्धस्य जन्तोः।
त्वमेका गतिर्देवि निस्तारकर्त्री,
नमस्ते जगत्तारिणि त्राहि दुर्गे।।

अरण्ये रणे दारुणे शत्रुमध्ये,
ऽनले सागरे प्रान्तरे राजगेहे।
त्वमेका गतिर्देवि निस्तारनौका,
नमस्ते जगत्तारिणि त्राहि दुर्गे।।
अपारे महादुस्तरेऽत्यन्तघोरे,
विपत्सागरे मज्जतां देहभाजाम्।
त्वमेका गतिर्देवि निस्तारहेतुः,
नमस्ते जगत्तारिणि त्राहि दुर्गे।।
नमश्चण्डिके चण्डदुर्दण्डलीला,
समुत्खण्डिताखण्डिताशेषशत्रो।
त्वमेका गतिर्दव निस्तारबीजं,
नमस्ते जगत्तारिणि त्राहि दुर्गे।।
त्वमेवाघभावाधृतासत्यवादीर्न,
जाताजितक्रोधनात् क्रोधनिष्ठा।
इडा पिङ्गला त्वं सुषुम्णा च नाडी,
नमस्ते जगत्तारिणि त्राहि दुर्गे।।
नमो देवि दुर्गे शिवे भीमनादे,
सरस्वत्यरुन्धत्यमोघस्वरूपे।
विभूतिः शची कालरात्रिः सतिः त्वं,
नमस्ते जगत्तारिणि त्राहि दुर्गे।।

सरस्वती वंदना

श्वेत-पद्मासना देवी श्वेत-पुष्पोप-शोभिता।
श्वेताम्बर-धरा नित्या श्वेत-गन्धानु लेपना।।

श्वेताक्षी शुक्ल वस्त्रा च श्वेत-चन्दन-चर्चिता।
वरदा सिन्धु-गन्धर्वैः ऋषिभिः स्तूयते सदा।।
स्तोत्रेणाऽनेन तां देवीं जगद्धात्रीं सरस्वतीम्।
ये स्तुवन्ति त्रिकालेषु सर्वविद्या लभन्ति ते।।
या देवी स्तूयते नित्यं ब्रह्मेन्द्र-सुर-किन्नरैः।
सा ममैवाऽस्तु जिह्वाग्रे पद्महस्ता सरस्वती।।

अपराध क्षमा स्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो,
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः।
न जाने मुद्रास्ते तदपि च न जाने विलपनं,
परं जाने मातस्त्वदनुसरणं क्लेशहरणम्।
विधेर्-अज्ञानेन द्रविण विरहेणा लसतया,
विधेयाशक्यत्वात्-तव चरणयो र्या च्युतिरभूत्।
तदेतत् क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।
पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्विचदपि कुमाता न भवति।
जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।

परित्यक्ता देवा विविधविधसेवाकुलतया,
मया पञ्चाशीतेर धिकमपनीते तु वयसि।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता,
निरालम्बो लम्बोदरजननि कं यामि शरणम्।
श्वपाको जल्पाको भवति मधुपाकोपमगिरा,
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं,
जनः को जानीते जननि जपनीयं जपविधौ।
चिताभस्मालेपो गरलमशनं दिक्पटधरो,
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः।
कपाली भूतेशो भजति जगदीशैकपदवीं,
भवानि त्वत्पाणि ग्रहण परिपाटी फलमिदम्।
न मोक्षस्याकाङ्क्षा भवविभव वाञ्छापि च न मे,
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः।
अतस्त्वां संयाचे जननि जननं यातु मम वै,
मृडानी रुद्राणी शिव शिव भवानीति जपतः।
नाराधितासि विधिना विविधोपचारैः,
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे,
धत्से कृपाम् उचितम् अम्ब परं तवैव।
आपत्सु मग्नः स्मरणं त्वदीयं, करोमि दुर्गे करुणार्णवेशि।
नैतच्छठत्वं मम भावयेथाः, क्षुधातृषार्ता जननीं स्मरन्ति।
जगदम्ब विचित्रमत्र किं, परिपूर्णा करुणास्ति चेन्मयि।
अपराधपरम्परापरं न हि माता समुपेक्षते सुतम्।

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि।
एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु।

आरती लक्ष्मी जी

ओ3म् जय लक्ष्मी माता, मैया जय लक्ष्मी माता।
तुमको निशदिन सेवत, हर विष्णु दाता,
ओ3म् जय लक्ष्मी माता।।
उमा, रमा, ब्रह्माणी, तु ही जग माता,
मैया तु ही जग माता।
सूर्य-चन्द्रमा ध्यावत, नारद ऋषि गाता,
ओ3म् जय लक्ष्मी माता।।
दुर्गा रूप निरंजनि, सुख-सम्पति दाता।
मैया तु ही सुख-सम्पति दाता।
जो कोई तुमको ध्यावत, ऋद्धि-सिद्धि धन पाता,
ओ3म् जय लक्ष्मी माता।।
तुम पाताल-निवासिनि, तुम ही शुभदाता,
मैया तु ही शुभदाता।
कर्म-प्रभाव-प्रकाशिनि, भवनिधि की त्राता,
ओ3म् जय लक्ष्मी माता।।
जिस घर में तुम रहती, सब सद्गुण आता,
मैया सब सद्गुण आता।
सब सम्भव हो जाता, मन नहीं घबराता,
ओ3म् जय लक्ष्मी माता।।
तुम बिन यज्ञ न होते, वस्त्र न हो पाता,

मैया वस्त्र न हो पाता।
खान-पान का वैभव, सब तुमसे आता,
ओ3म् जय लक्ष्मी माता।।
शुभ-गुण मंदिर सुन्दर, क्षीरोदधि-जाता,
मैया क्षीरोदधि-जाता।
रत्न चतुर्दश तुम बिन, कोई नहीं पाता,
ओ3म् जय लक्ष्मी माता।।
महालक्ष्मी जी की आरती, जो कोई जन गाता,
मैया जो कोई जन गाता।
उर आनन्द समाता, पाप उतर जाता,
ओ3म् जय लक्ष्मी माता।।

गंगा माँ

ओ3म् जय गंगे माता, मैया जय गंगे माता।
जो नर तुमको ध्याता, मनवांछित फल पाता,
ओ3म् जय गंगे माता।
चन्द्र सी ज्योति तुम्हारी, जल निर्मल आता,
मैया जल निर्मल आता।
शरण पड़े जो तेरी, सो नर तर जाता,
ओ3म् जय गंगे माता।
पुत्र सागर के तारे, सब जग को ज्ञाता,
मैया सब जग को ज्ञाता।
कृपा दृष्टि हो तुम्हारी, त्रिभुवन सुख दाता,
ओ3म् जय गंगे माता।
एक बार जो प्राणी, शरण तेरी आता,

मैया शरण जो तेरी आता।
यम की त्रास मिटाकर, परमगति पाता,
ओ3म् जय गंगे माता।
आरती मातु तुम्हारी, जो नर नित गाता,
मैया जो नर नित गाता।
सेवक वही सहज में, मुक्ति को पाता,
ओ3म् जय गंगे माता।

गुरु स्तुति :

ॐ ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं,
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्।
एकं नित्यं विमलमचलं सर्वधी साक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि।
स्मारं स्मारं जनिमृतिभयं जातनिर्वेदवृत्ति
ध्यायं ध्यायं पशुपतिमु माकान्तमन्त निर्षण्णम्।
पायं पायं सपदि परमानन्द पीयूषधारा
भूयोभूयो निजगुरुपदाम्भोजयुग्मं नमामि ।
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।
नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम्।
शिरसा योगपीठस्थं धर्मकामार्थसिद्धये।
श्रीगुरुं परमानन्दं वन्दाम्यानन्द विग्रहम्।
यस्य सान्निध्यमात्रेण चिंदानन्दायते परम्।।
अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।

तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः।
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।
हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन।
सर्वदेवस्वरूपाय तस्मै श्रीगुरवे नमः।
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः।
गुरुरेव जगत्सर्व तस्मै श्रीगुरवे नमः।
ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम्।
ज्ञानमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा।
नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे।
विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह।
नवाय नवरूपाय परमार्थैकरूपिणे।
सर्वाज्ञान तमोभेद भानवे चिद्धनाय ते।
स्वतन्त्राय दयाक्लृप्त विग्रहाय परात्मने।
परतन्त्राय भक्ताना भव्यानां भव्यहेतवे।
ज्ञानिनां ज्ञानरूपाय प्रकाशाय प्रकाशिनाम्।
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम्।
पुरस्तात्पाश्र्वयोः पृष्ठे नमस्कुर्यामुपर्यधः।
सदा मच्चित्तरूपेण विधेहि भवदासनम्।

इति गुरुस्तुतिः।।

नवग्रहपीडाहर स्तोत्रम्

सूर्य
ग्रहाणाम्-आदिर्-आदित्यो-लोकरक्षण-कारकः,
विषमस्थान-सम्भूतां-पीडा-हरतु-मे रविः।

चन्द्र
रोहिणीशः सुधामूर्तिः सुधागात्रःसुधाशनः,
विषम-स्थान सम्भूतां पीडां हरतु मे विधुः।

भौम
भूमिपुत्रो महातेजो जगतां भयकृत् सदा,
वृष्टिकृद्-वृष्टि-हर्ता च पीडां हरतु मे कुजः।

बुध
उत्पातरूपो जगतां चन्द्र पुत्रो महाद्युतिः,
सूर्यप्रिय करो विद्वान्, पीडां हरतु मे बुधः।

गुरु
देवमन्त्री विशालाक्षः सदा लोकहिते रतः,
अनेक शिष्यसम्पूर्णः पीडां हरतु मे गुरुः।

शुक्र
दैत्यमन्त्री गुरुस्तेषां प्राणदश्च महामतिः,
प्रभुस्तारा ग्रहाणां च पीडां हरतु मे भृगुः।

शनि
सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः,
मन्दाचारः प्रसन्नात्मा पीडां हरतु मे शनिः।

राहु
महाशिरो महावक्त्रो दीर्घदंष्ट्रो महाबलः,
अतनुश्चोर्ध्वकेशश्च पीडां हरतु मे शिखी।

केतु
अनेक-रूप-वर्णश्च शतशोथ सहस्रशः,
उत्पादरूपो जगतां पीडां हरतु मे तमः।

इन्द्राक्षी

अस्य श्री इंद्राक्षी स्तोत्रमन्त्रस्य, पुरंदर-ऋषिः, अनुष्टप्-छन्दः, इन्द्राक्षी देवता, ह्रीं बीजम्, श्रीं शक्तिः, क्लीं कीलकम्। सकलकामना - सिद्ध्यर्थे पाठे विनियोगः।

अथ–ध्यानम्

इन्द्राक्षीं द्विभुजां देवीं पीत-वस्त्राधरां शुभाम्
वामे हस्ते वज्रधरां दक्षिणे चाभय-प्रदाम्।
सहस्त्र नेत्रां सूर्याभां नानालंकार-भूषिताम्,
प्रसन्न वदनां नित्यम्-अप्सरो-गणसेविताम्।
श्री-दुर्गा सौम्य-वदनां पाशांकुशधरां परां,
त्रौलोक्य-मोहिनीं देवीं भवानीं प्रणमाम्यहम्।
ॐ ह्रीं श्रीं इन्द्राक्षीं श्रीं प्रीं स्वाहा।

इन्द्र–उवाच

इन्द्राक्षी नाम सा देवी देवतैः समुदाहृता,
गौरी शाकंभरी देवी दुर्गा-नाम्नीति-विश्रुता।
कात्यायनी महादेवी चन्द्र-घण्टा-महातपः,
गायत्री सा च सावित्री ब्रह्माणी ब्रह्मवादिनी।
नारायणी भद्रकाली रुद्राणी कृष्णपिंगला,
अग्निज्वाला रौद्रमुखी कालरात्री-स्तपस्विनी।
मेघ-श्यामा सहस्त्राक्षी, विष्णुमाया जलोदरी,

महोदरी मुक्त-केशी घोररूपा महाबला।
आनन्दा-भद्रजा नंदा रोगहंत्री शिवप्रिया,
शिवदूती कराली च प्रत्यक्षा परमेश्वरी।
इन्द्राणी चन्द्ररूपा च इन्द्र-शक्ति-परायणा,
महिषा-सुर-संहर्त्री चामुण्डा गर्भदवेता।
वाराही नारसिंही च भीमा भैरव नादिनी,
श्रुतिः स्मृति-धृति-मेधा विद्या लक्ष्मीः सरस्वती।
आनंदा विजया पूर्णा मानस्तोकाऽ पराजिता,
भवानी पार्वती दुर्गा हैमवत्यंबिका शिवा।
शिवा भवानी रुद्राणी शंकरार्ध-शरीरिणी,
एतै-र्नाम-पदै-र्दिव्यैः स्तुता शक्रेण धीमता।
आयुर्-आरोग्यम्-ऐश्वर्यं सुख-संपत्तिकारकम्,
क्षया-पस्मार कुष्ठादि-ताप - ज्वर-निवारकम्।

आरती

ॐ जय जगदीश हरे, स्वामी जय जगदीश हरे।
भक्तजनों के संकट क्षण में दूर करे,
ओ३म् जय जगदीश हरे।।
जो ध्यावे फल पावे दुःखविनशे मन का,
स्वामी दुःखविनशे मन का।
सुख सम्पत्ति घर आवे कष्ट मिटे तन का,
ओ३म् जय जगदीश हरे।।
मात-पिता तुम मेरे शरण पड़ूँ मैं किसकी,

स्वामी शरण पड़ूँ में किसकी।
तुम बिन और ना दूजा आस करूँ में जिसकी,
ओ३म् जय जगदीश हरे।।
तुम-पूरण-परमात्म तुम अन्तर्यामी,
स्वामी तुम अन्तर्यामी।
पारब्रह्म परमेश्वर तुम सबके स्वामी,
ओ३म् जय जगदीश हरे।।
तुम-करुणा के सागर तुम पालन कर्त्ता,
स्वामी तुम पालन कर्त्ता।
मैं सेवक तुम स्वामी कृपा करो भर्त्ता,
ओ३म् जय जगदीश हरे।।
तुम हो एक अगोचर सबके प्राणपति,
स्वामी तुम सबके प्राणपति।
किस विधि मिलों दयामय तुमको मैं कुमति,
ओ३म् जय जगदीश हरे।।
दीन बन्धु दुःख हर्ता रक्षक तुम मेरे,
स्वामी रक्षक तुम मेरे।
अपने चरण लगावो द्वार पड़ा में तेरे,
ओ३म् जय जगदीश हरे।।
विषय विकार मिटाओ पाप हरो देवा,
स्वामी पाप हरो देवा।
श्रद्धा भक्ति बढ़ाओ सन्तन की सेवा,
ओ३म् जय जगदीश हरे।।

देवीस्तुतिः

ॐ नमो भवान्यै

(कशमीर के श्री धर्माचार्यकृत पञ्चस्तवी से)

ददातीष्टान्भोगान्क्षपयति रिपून्हन्ति विपदो
दहत्याधीन्व्याधीञ्छमयति सुखानि प्रतनुते।
हठादन्तर्दुःखं दलयति पिनष्टीष्टविरहं
सकृद्ध्याता देवी किमिव निरवद्यं न कुरुते।।
अजानन्तो यान्ति क्षयमवशमन्योन्यकलहै
रमी मायाग्रन्थौ तव परिलुठन्तः समयिनः।
जगन्मातर्जन्मज्वरभयतमः कौमुदि! वयं
नमस्ते कुर्वाणाः शरणमुपयामो भगवतीम्।।
मनुष्यास्तिर्यञ्चो मरुत इति लोकत्रयमिदं
भवाम्भेधौमग्नं त्रिगुणलहरीकोटिलुठितम्।
कटाक्षश्चेदत्र क्वचन तव मातः! करुणया
शरीरी सद्योऽयं व्रजति परमानन्दतनुताम्।।
पिता माता भ्राता सुहृदऽनुचरः सद्म गृहिणी
वपुः पुत्रो मित्रं धनमपि यदा मां विजहति।
तदा मे भिन्दाना सपदि भयमोहान्धतमसं
महाज्योत्स्ने मातर्भव करुणया सन्निधिकरी।।
शिवस्त्वं शक्तिस्त्वं त्वमसि समया त्वं समयिनी
त्वमात्मा त्वं दीक्षा त्वमयम णिमादिर्गुणगणः।
अविद्या त्वं विद्या त्वमसि निखिलं त्वं किमपरं

पृथक्तत्त्वं त्वत्तो भगवति! न वीक्षामह इमे।।
असंख्यैः प्राचीनैर्जननि जननैः कर्मविलया
द्रते जन्मन्यन्तं गुरुवपुषमासाद्य गिरिशम्।
अवाप्याज्ञां शैवीं क्रमतनुरपि त्वां विदितवा
न्नयेयं त्वत्पूजास्तुतिविरचनेनैव दिवसान्।।
(श्रीमदाद्य शंकराचार्यकृत सौन्दर्यलहरी से)

त्वदन्यः पाणिभ्यामभयवरदो दैवतगण
स्त्वमेका नैवासि प्रकटितवराभीत्यभिनया।
भयात्त्रातुं दातुं फलमपि च वाञ्छासमधिकं
शरण्ये लोकानां तव हि चरणावेव निपुणौ।।
सुधासिन्धोर्मध्ये सुरविटपिवाटी परिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे।
शिवाकारे मंचे परमशिवपर्यङ्क निलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम्।।
भवानि! त्वं दासे मयि वितर दृष्टिं सकरुणा
मिति स्तोतुं वाञ्छन् कथयति भवानि त्वमिति यः।
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं
मुकुन्दब्रह्मेन्द्रस्फुटमुकुटनीराजितपदाम्।।
शब्दब्रह्ममयि स्वच्छे देवि त्रिपुरसुन्दरि!
यथाशक्ति जपं पूजां गृहाण परमेश्वरि।।
नन्दन्तु साधकाः सर्वे विनश्यन्तु विदूषकाः।
अवस्था शाम्भवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा।।

न जानामि ध्यानं तव चरणयोः प्रीतिजननं
न जानामि न्यासं मननमपि मातर्न गिरिजे!
तदेतदक्षन्तव्यं न खलु सत्त्वरोषा समुचित
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।।

भवान्यष्टकम्

न तातो न माता न बन्धुर्न दाता
न पुत्रो न पुत्री न भृत्यो न भर्ता।
न जाया न विद्या न वृत्तिममैव
गतिस्त्वं गतिस्त्वं त्वमेका भवानि।।
भवाब्धावपारे महादुःखभीरु
पपात प्रकामी प्रलोभी प्रमत्तः।
कुसंसारपाशप्रबद्धः सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि।।
न जानामि दानं न च ध्यानयोगं
न जानामि तन्त्रं न स्तोत्रमन्त्रम्।
न जानामि पूजां न च न्यासयोगम्
गतिस्त्वं गतिस्वं त्वमेका भवानि।।
न जानामि पुण्यं न जानामि तीर्थं
न जानामि मुक्तिं लयं वा कदाचित्।
न जानामि भक्तिं व्रतं वापि मातः
गतिस्त्वं गतिस्त्वं त्वमेका भवानि।।

कुकर्मी कुसङ्गी कुबुद्धिः कुदासः
कुलाचारहीनः कदाचारलीनः।
कुदृष्टिः कुवाक्यप्रबन्धः सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि।।

प्रजेशं रमेशं महेशं सुरेशं
दिनेशं निशीथेश्वरं वा कदाचित्।
न जानामि चान्यत् सदाहं शरण्ये
गतिस्त्वं गतिस्त्वं त्वमेका भवानि।।

विवादे विषादे प्रमादे प्रवासे
जले चानले पर्वते शत्रु मध्ये।
शरण्ये शरण्ये सदा मां प्रपाहि
गतिस्त्वं गतिस्त्वं त्वमेका भवानिं।।

अनाथो दरिद्रो जरारोगयुक्तो
महाक्षीणदीनः सदा जाड्यवक्त्रः।
विपत्तौ प्रविष्टः प्रनष्टः सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि।।

प्रातः स्मरणीय स्तोत्र

एक-श्लोकी-नवग्रहस्तोत्रम्

ब्रह्मा-मुरारिः-त्रिपुरान्त-कारी,
भानुः शशी भूमिसुतो बुधश्च,
गुरुश्च शुक्रः शनि-राहु केतवः
कुर्वन्तु सर्वे मम सुप्रभातम्।।

एक श्लोकी रामायण

आदौ राम-तपोवनादि-गमनं, हत्वा मृगं कांचनं
वैदेही-हरणं जटायु-मरणं सुग्रीव सम्भाषणम्।
बाली निर्दलनं समुद्र तरणं लंकापुरी-दाहनं
पश्चात् रावण कुम्भकर्ण-हननं चैतत्-हि-रामायणम्।

एकश्लोकी भागवत्

आदौ देवकि-देवगर्भ जननं गोपीगृहे-वर्धनम्
माया-पूतनि-जीवितापहरणं गोवर्द्धनो-द्धारणम्
कंस-च्छेदन कौरवादि-हननं कुन्ती सुता-पालनम्।
एतत्-भागवतं पुराण कथितं श्रीकृष्ण-लीलामृतम्।

सप्तर्षि – स्मरणम्

कश्यपो-अत्रिः-भरद्वाजः, विश्वामित्रोऽथ गौतमः
जमदग्नि-र्वसिष्ठश्च सप्त-ते ऋषयः स्मृताः।

सप्तचिर–जीवि स्तुतिः

अश्वत्थामा बलि व्यासः, हनुमान् च विभीषणः
कृपः परशुरामश्च, सप्त-ते चिरजीविनः

पंचदेवी स्तुतिः

उमा उषा च वैदेही, रमा गंगेति पंचकम्
प्रातर्-एव स्मरेत्-नित्यं घोर-संकट-नाशनम्।।

पंचकन्या स्तुतिः

अहल्या द्रौपदी तारा, कुन्ती मन्दोदरी तथा
पंचकन्या स्मरेत्-नित्यं महापातक-नाशनम्।

सप्तपुरी स्तुतिः

अयोध्या मथुरा माया काशी कांची ह्यवन्तिकाः।
पुरी द्वारवती चैव सप्तता मोक्षदायिकाः।।

हकारादि–पञ्चदेव स्तुतिः

हरं हरिं हरिश्चन्द्रं हनुमन्तं हलायुध्म
पंचकं हं स्मरेत्-नित्यं घोर-संकटनाशनम्

प्रातर्वन्दनीय स्तुतिः

प्रातः काले पिता-माता, ज्येष्ठा-भ्राता तथैवच
आचार्याः स्थाविराः चैव, वन्दनीया दिने दिने।

मातृतीर्थम्

नास्ति मातृसमं तीर्थं पुत्राणां तारणाय च
हितायात्र परत्रार्थं यैस्तु माता प्रपूजिता।

पितृ तीर्थम्

वेदैर्-अपि च किं पुत्र ! पिता येन प्रपूजितः
एष पुत्रस्य वै धर्म-स्तथा तीर्थं नरेष्विह।।

मृतसंजीवनी मंत्र

इस मन्त्र से शिलिंग पर दूध सहित जल चढ़ाने से रोगी को शीघ्र आराम मिलता है। ॐ हौं जूं सः, ॐ भूभुर्वः स्वः, ॐ त्र्यम्बकं यजामहे, ॐ तत्सवितुर्वरेण्यं, ॐसुगन्धिं पुष्टिवर्धनम्, ॐ भर्गो देवस्य धीमहि, ॐ

उर्वारुकमिव बन्धनाद्, ॐ धियो यो नः प्रचोदयात्, ॐ मृत्योर्मुक्षीय मामृतात्, ॐ स्वः भुवः भूः ॐ सः जूं हौ ॐ।

सूर्य उपासना

शास्त्रों में दर्ज है सूर्य की उपासना से आरोग्य की प्राप्ति होती है। अतः नहाने तथा मुख प्रक्षालन के पश्चात् सूर्य की ओर मुख करके प्रणाम करते हुये पढ़ें:-

ॐ मित्राय नमः। ॐ रवये नमः। ॐ सूर्याय नमः। ॐ भानवे नमः। ॐ खगाय नमः। ॐ पूष्णे नमः। ॐ हिरण्यगर्भाय नमः। ॐ मरीचये-नमः। ॐ आदित्याय नमः। ॐ सवित्रे नमः। ॐ अर्काय नमः। ॐ भास्कराय नमः। ॐ मित्र-रवि-सूर्य-भानु- खग-पुष्प-हिरण्यगर्भ-मरीच्यादित्य सवित्रार्क -भास्करेभ्यो नमः।

असाध्य रोग निवृत्ति मंत्र

रोगान्-अशेषान्-अपहंसि-तृष्टा
रुष्टा तु कामन्-सकलान्-अभीष्टान्।
त्वाम्-आश्रितानां न विपत्-नराणाम्
त्वाम्-आश्रिता ह्यश्रियतां प्रयान्ति।।

दुर्गा सप्तशती का सारभूत मंत्र

जिस घर में इस मंत्र की गूंज होगी उस घर

में लक्ष्मी, सतबुद्धि श्रद्धा, लज्जा, हर समय विद्यमान रहती है।

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः,
श्रद्धा सतां कुलजन-प्रभवस्य लज्जा,
तां त्वां नताःस्म परिपालय देवि! विश्वम्।

नवग्रहों के छोटे तथा आसान मन्त्र

"सूर्य" ओ३म् रं रवये नमः।
"चन्द्र" ओ३म् सौं सोमाय नमः।
"भौम" ओ३म् भौं भौमाय नमः।
"बुध" ओ३म् बं बुधाय नमः।
"गुरु" ओ३म् गुं गुरवे नमः।
"शुक्र" ओ३म् शुं शुक्राय नमः।
"शनि" ओ३म् शं शनैश्चराय नमः।
"राहु" ओ३म् राम् राहवे नमः।
"केतु" ओ३म् कें केतवे नमः।

बारह राशियों के मन्त्र

मेषः- ओ३म् ह्रीं श्रीं श्रीलक्ष्मीनारायाणाय नमः।
वृषः- ओ३म् गोपालाय उत्तरध्वजाय नमः।
मिथुनः- ओ३म् क्लीं कृष्णाय नमः।
कर्कः- ओ३म् ह्रीं हिरण्यगर्भाय अव्यक्तरूपिणे नमः।
सिंहः- ओ३म क्लीं ब्रह्मणे जगदाधाराय नमः।
कन्याः- ओ३म् पीं पीताम्बराय नमः।

तुला:- ओ३म् तत्त्वनिरंजनाय तारक रामाय नमः।
वृश्चिक:- ओ३म् नारायणाय सूरसिंहाय नमः।
धनु:- ओ३म् श्रीं देवकृष्णाय ऊर्ध्वजाय नमः।
मकर:- ओ३म् श्रीं-वत्सलाय नमः।
कुम्भ:- ओ३म् श्रीं उपेन्द्राय अच्युताय नमः।
मीन:- ओ३म् क्लीं उद्धृताय उद्धारिणे नमः।

हर प्रकार के मंगल प्राप्ति का मन्त्र

सर्व मंगल मंगल्ये, शिवे सर्वार्थ साधिके,
शरण्ये त्र्यम्बके, गौरि नारायणि नमोस्तुते।

विपित्ति नाश का मंत्र

शरणागत दीनार्त-परित्राण परायणे,
सर्वस्यार्ति हरे देवि नारायणि नमोस्तुते।

सभी उलझनों से छुटकारा पाने का मंत्र

सर्वाबाधा-विर्निमुक्तो-धन धान्य-समन्विताः
मनुष्यो मत्प्रसादेन, भविष्यति-न संशयः।

भय नाश का मन्त्र

सर्वस्वरुपे-सर्वेशे सर्वशक्ति-समन्विते
भयेभ्यः त्राहि नो देवि ! दुर्गे देवि नमोस्तुते।

आरोग्य तथा सौभाग्य मंत्र

देहि सौभाग्यम् आरोग्यं देहि मे परमं सुखम्,
रूपं देहि जयं-देहि यशो देहि द्विषो जहि।

विद्या प्राप्ति का मन्त्र

कृष्ण कृष्ण महाकृष्ण सर्वज्ञ त्वं प्रसीद मे,
रमा-रमण विश्वेश, विद्याम्-आशु प्रयच्छ मे।।

हर प्रकार के उलझनों से मुक्त होने के लिए शीघ्र सिद्धि देने वाला शिव मंत्र

भगवान् शंकर के डमरु से प्राप्त 14 सूत्रों का एक ही श्वास में बोलने का अभ्यास करें-शरीर को स्वस्थ रखने के लिए इस मन्त्र का उच्चारण किया जाता है, बुखार मृगी आदि बेहोशी के रोग के समय इस मन्त्र का उच्चारण करते हुये छींटे दिये जाने से रोग की निवृति होती है:-

मन्त्रः- अ इ उण्। ऋ लृक्। ए ओङ। ऐ औच्। ह य व र ट्। लण्। ञ, म, ङ ण नम्। झ भ ङ् घ ड ध श। ज ब ग ड् - द श। ख फ छठ थ - च ट, तव्। क, प, य्। शष सर्। हल्।

संतान प्राप्ति का मंत्र

देवकी सुत गोविन्द ! वासुदेव जगत्पते
देहि से तनयं कृष्ण। त्वाम् - अहं शरणं गतः।

सामूहिक कल्याण मंत्र

देव्या यया ततमिदं जगदात्म शक्त्या,
निश्शेष देव गण शक्तिसमूह मूर्त्या।

तामम्बिकाम खिलदेव महर्षि पूज्यां,
भक्त्या नतः स्म विदधातु शुभानि सा नः।।

शुभ फल की प्राप्ति का मंत्र

करोतु सा नः शुभहेतुरीश्वरी।
शुभानि भद्राण्यभिहन्तु चापदः।।

पाप नाश का मंत्र

हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत्।
सा घण्टा पातु नो देवि पापेभ्योऽनः सुतानिव।।

महामारी नाश का मंत्र

जयन्ती मङ्गला काली भद्रकाली कपालिनी।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते।।

दारिद्र्यदुःखादिनाश का मंत्र

दुर्गे स्मृता हरसि भीतिम शेषजन्तोः
स्वस्थैः स्मृता मतिम् अतीव शुभां ददासि।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकार करणाय सदाऽऽर्द्रचित्ता।।

रक्षा पाने का मंत्र

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च।।

प्रसन्नता प्राप्ति का मंत्र

प्रणातानां प्रसीद त्वं देवि विश्वोर्तिहारिणि।
त्रैलोक्य वासिनाम् ईड्ये लोकानां वरदा भव।।

पापनाश तथा भक्ति प्राप्ति का मंत्र

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे।
रूपं देहि जयं देहि यशो देहि द्विषो जहि।।

मोक्ष प्राप्ति का मंत्र

त्वं वैष्णवी शक्तिर् अनन्तवीर्या
विश्वस्य बीजं परमासि माया।
सम्मोहित देवि समस्तमेतत्
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः।।

अन्नपूर्णा स्तुतिः

ज्योंही अन्न की थाली आप के सामने आये। तो इस श्लोक का उच्चारण करना चाहिये।

अन्नपूर्णे सदापूर्णे शंकर प्राण वल्लभे।
ज्ञान वैराग्य सिद्ध्यर्थं भिक्षां देहि च पार्वति।।

पुरुष—सूक्तम्

पुरुषमेधाः पुरुषस्य नारायणस्यार्षम्।

ॐ सहस्त्रशीर्षा, पुरुषः सहस्राक्षः सहस्त्रपात्।
सभूमिं विश्वतो वृत्वा त्यतिष्ठत् दशाङ्गुलम्।।
पुरुष एवेदं सर्वं यत् भूतं चत् च भव्यम्।
उत्तामृत त्वस्ये शानो, यत् अन्नेनाति रोहति।।
एतावानस्य महिमातो ज्यायान-च, पुरुषः।
पादोस्य, विश्वा भूतानि त्रिपाद् अस्या मृतं दिबि।।

त्रिपात् ऊर्ध्वं उदैत्पुरुषः पादोऽस्येहा भवत् पुनः।
ततो विश्वं व्याक्रामत् साशना नशने अभि।।
तस्मात् विराड् अजायत विराजो अधिपुरुषः।
स जातो अत्यरिच्यत, पश्चात् भूमिम्-अथो पुरः।।
यत् पुरुषेण हविषा देवा यज्ञम्-अतन्वत।
वसन्तो अस्यासीत्-आज्यं ग्रीष्म इध्मः शरत् हविः।।
तं यज्ञं बर्हिषि प्रोक्षन् पुरुषं जातम्-अग्रतः।
तेन देवा अयजन्त साध्या ऋषयश्च ये।।
तस्मात् यज्ञात् सर्वहुतः सम्भृतं पृषत् आज्यम्।
पशून् तान् चक्रे वायव्यान् आरण्यान् ग्राम्यांश्चये।।
तस्मात् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।
छन्दासि जज्ञिरे तस्मात् यजु तस्मात् अजायत।।
तस्मात्-अश्वा-अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात् तस्मात् जाता अजावयः।।
यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्य कौ बाहू का उरू पादा उच्यते।।
ब्रह्माणोस्य मुखं-आसीत्-बाहू राजन्यः कृतः।
ऊरू तदस्य यत् वैश्यः पद्भ्यां शूद्रो अजायत।।
चन्द्रमः मनसो जातश्चक्षोः सूर्यो अजायत।
मुखात् इन्द्रश्चाग्निश्च प्राणात् वायुः अजायत।।
नाभ्या आसीत् अन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमि दिंशः श्रोत्रात् तथा लोकान्-अकल्पयन्।।

सप्तास्या सन् परिधयः त्रिः सप्त समिधः कृताः।
देवा यत् यज्ञं तन्वाना आबध्नन् पुरुषं पशुम्।।
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमा न्यासन्
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्या सन्ति देवाः।।

सूर्याष्टकम्

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते।।
सप्ताश्वरथमारूढं प्रचण्डं कश्यपात्मजम्।
श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम्।।
लोहितं रथमारूढं सर्वलोकपितामहम्।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम्।।
त्रैगुण्यं च महाशूरं ब्रह्मविष्णुमहेश्वरम्।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम्।।
बृंहितं तेजःपुञ्जं च वायुमाकाशमेव च।
प्रभुं च सर्वलोकानां तं सूर्यं प्रणमाम्यहम्।।
बन्धूकपुष्पसङ्काशं हारकुण्डलभूषितम्।
एकचक्रधरं देवं तं सूर्यं प्रणमाम्यहम्।।
तं सूर्यं जगत्कर्तारं महातेजःप्रदीपनम्।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम्।

शांतिपाठ

भद्रंकर्णेभिः श्रृणुयाम देवाः, भर्द्रं पंश्येमाक्षिभिर्यजत्राः।

स्थिरैरंगैः तष्टुवांसस्तनूभि र्व्यशेम देवहित यदायुः,
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्तिनः तार्क्ष्यो अरिष्टनेमीः स्वस्ति नो बृहस्पतिः
दधातु।।

स्वस्तिप्रजाभ्यः परिपालयन्तां,
न्यायेन मार्गेण महीं महीपाः।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं,
लोकाः समस्तः सुखिनो भवन्तु।।
काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी।
देशोयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः।।
दुर्जनः सज्जनो भूयात् सज्जनः शान्तिम् आप्नुयात्।
शान्तिम् उच्येत बन्धेभ्यो मुक्तश्चान्यान् विमोचयेत्।।
सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः,
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग्भवेत्।।
राजस्वस्ति प्रजास्वस्ति देशस्वस्ति तथैव च।
यजमान गृहे स्वस्ति, स्वस्ति गोब्राह्मणेषु च ।।
विधेहि देवि कल्याणं विधेहि परमां श्रियं
रूपं देहि जयं देहि यशो देहि द्विषो जहि।।
शन्नो मित्रः, शं वरुणः, शन्नो भवत्वर्यमा, शन्नो इन्द्रो बृहस्पतिः, शन्नो विष्णुरुरुक्रमः, नमो ब्रह्मणे, नमो वायवे, नमस्ते वायो, त्वमेव प्रत्यक्षं ब्रह्मासि, त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि, ऋतं वदिष्यामि,

सत्यं वदिष्यामि, तन्मामवतु, तद्वक्तारमवतु, अवतु मामवतु वक्तारं, शान्तिः शान्तिः शान्तिः।।
सह नौ अवतु, सह नौ भुनक्तु, सहवीर्य करवावहै, तेजस्विनाम् अधीतमस्तु माद्विषावहै शान्तिः शान्तिः शान्तिः।।

ब्राह्मी–विद्या

ॐ ॐ ॐ त्रिगुणपुरुष क्षेत्रचर, मोहं भिन्धि, रजस्तमसी भिन्धि, प्राकृत-पाशजालं-सावरणं परिहर, सत्वं ग्रहाण-पुरुषोत्तमोसि, सोम-सूर्यानल, प्रवर, परमधामन् ब्रह्म विष्णुमहेश्वरस्वरूप,, सृष्टिस्थिति - संहारकारक, भ्रू-मध्य-निलय, तेजोसि- धामासि - अमृतात्मन् ॐ तत्सत् हँसः, शुचिषत्, वसुरन्त-होता वेदिषत् अतिथि-दुरोणसत्, नृषत्-वरसत्-ऋतसत्-व्योमसत्, अब्जा गोजा ऋतजा अद्रिजा ऋतं, परंब्रह्म-स्वरूप, सर्वगत सर्वशक्ते, सर्वेश्वर, सर्वेन्द्रिय-ग्रन्थि भेदं कुरु, परमं-पदं परामर्शय परमार्ग ब्रह्म-द्वारं सर, कुमार्ग-जहि - षट्-कोशिकं शरीरं-त्यज, शुद्धोसि बुद्धोसि विमलोसि क्षमस्व स्वपदम्-आस्वादय स्वाहा।

ब्राह्मी विद्या

ॐ ॐ ॐ = तीन प्रकार के दुःखों का निवारण करने के लिए मंगलरूप में तीन बार आरम्भ में 'ॐ' का उच्चारण किया गया है, त्रिगुण पुरुष = तुम त्रिगुण पुरुष हो अर्थात् तीन गुणों में तेरा ही निवास है, क्षेत्र चर = शरीर रूपी क्षेत्र में फिरने से तुम ही क्षेत्रचर हो,

मोहं = मोह रूपी ग्रन्थि को, **भिन्धि**= **काटो**, **रजस्तमसी** = रजो गुण, तमो गुण रूपी ग्रथियों को काटो, **प्राकृत**= बनावटी, **पाशजालं** = बन्धनों का जाल, **सावरणं** = आवरण सहित, **परिहर** = फैंक दो, **सत्वं ग्रहाण** = तत्व को जान, **पुरुषोत्तमोसि** = तुम स्वयं ही पुरुषोत्तम हो, **सोम** = चन्द्रमा, **सूर्य** = सूरज, **अनल** = अग्नि, **प्रवर** = तेजोमय रूप, **परमधामन्** = उत्तम स्थान वाले, ब्रह्म, विष्णु, महेश्वर, **स्वरूप** = तुम ही ब्रह्मा, विष्णु, महेश रूप हो, **सृष्टि स्थिति** = तुम ही सृष्टि को बनाने वाले हो, **संहार कारक** = नाश करने वाले हो, **भ्रू-मध्य-निलय** = भ्रुवों के मध्य में ध्यान टिकाने से तुम जाने जाते हो, **तेजोसि** = तुम तेज रूप हो, **धामासि** = तुम उत्तम धाम वाले हो, **अमृतात्मन्** = तुम अमृत रूप हो, **ॐ तत्सत्** = तुमं सत् रूप हो, **हंस** = तुम स्वयं प्रकाश हो, **शुचिषत्** = तुम निर्मल स्थान पर रहने वाले हो, **वसुरन्त-रिक्षसत्** = तुम आकाश में रहने वाले वस नाम के देवता हो, **होता** = तुम ही अग्नि में आहुति डालने वाले हो, **वेदिषत्** = तुम ही यज्ञ की वेदी पर ठहरे हुये अग्नि हो, **अतिथिर्दराणसत्** = तुम ही गृहस्थों में अतिथि रूप देवता हो, **नृषत्** = तुम मनुषयों में रहने वाले हो, **वरसत** = तुम देवताओं में रहने वाले हो, **ऋत ऋत्** = तुम सत्य में रहने वाले हो, **व्योम सत्** = तुम आकाश में ओत प्रोत हो, **अब्जः** = तुम जल में उत्पन्न होने वाले रत्न शंक आदि हो, **गोजा** = तुम पर्वतों तथा पृथ्वी से प्रकट होने वाले अन्न औषधि रूप हो, **अद्रिजा** = तुम पर्वतों से प्रकट होने वाले नदी-नाले रूप हो, **ऋतुजा** = तुम सब से महान् और परम सत्य हो, **परम-ब्रह्म-स्वरूप** = तुम परम ब्रह्म स्वरूप हो, **सर्वगत** = तुम सब मे गए हो, **सर्व शक्ते** = तुम सर्व शक्तिमान् हो, **सर्वेश्वर** = तुम सबों के स्वामी हो, **सर्वन्द्रिय** = सब इन्द्रियों से, **ग्रन्थि भेदं कुरु** = आसक्ति छोड़ो, **परमं-पदं** = उस परमपद का, **पर-मार्ग** = उस उत्तम मार्ग का, **परामर्शय** = विचार कर, **ब्रह्म-द्वारं सर** = ब्रह्मद्वार की ओर चल अर्थात् अपने स्वरूप को जान, **कुमार्ग जहि** = अज्ञान के मार्ग को छोड़, **षट-कौशिकं शरीरं** = इस षट् कोशिक शरीर अर्थात् रोम, रक्त, मांस, मज्जा, हड्डियों और वीर्य से बने हुये शरीर

को, त्यज = छोड़ो, शुद्धोसि = तुम शुद्ध रूप हो, बुद्धोसि = तुम बुद्धि रूप हो, विमलोसि = तुम निर्मल हो, स्वपदम्-आस्वादय स्वाहा = अपने स्वरूप का अनुभव कर इस ज्ञान को तू अच्छी प्रकार स्वीकार कर।

हरे राम हरे राम राम राम हरे हरे।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे।

सन्ध्या उपासना विधि

सन्ध्या का वास्तविक अर्थ है दिन और रात्रि के मिलने का समय, सांयकाल। शास्त्रों में सन्ध्या के विषय में लिखा है:–

संध्यामुपासते ये तु सततं संशितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम्॥

अर्थात्: जो नियम पूर्वक प्रतिदिन संध्या करते हैं वे पापरहित हो कर सनातन ब्रह्मलोक को प्राप्त होते हैं।

संध्योपासना हमारी संस्कृति का एक महत्वपूर्ण अंग है परन्तु समय के साथ साथ संध्योपासना का लोप होता जा रहा है इस को फिर से सुदृढ करने के निमित मैं संक्षिप्त रूप में शास्त्रानुसार संध्या उपासना विधि यहां पर लिख रहा हूँ ताकि हमारे नवयुवक इस को अपना कर अपने ज़ीवन का उद्धार करें तथा अपनी संस्कृति के अंग भूत सन्ध्या उपासना विॣ का प्रचार करें। हमारे पूर्वज दरिया के किनारे सन्ध्या करते थे परन्तु विस्थापन के कारण काश्मीरी पण्डित पूरे विश्व में भिखर गया और ऐसे स्थानो पर गये जहां पर दरिया, नदियां नही है इस कारण आप अपने बाथरूम में भी सून्या कर सकते है (यह शास्त्र की आज्ञा है।)

जब आप स्नान के लिये बाथरूम में नहाने के लिये जायेंगे तो सबसे पहले बायाँ पाँव धोते हुये पढ़ें– **ॐ नमोस्त्व-नन्ताय सहस्त्र मूर्तये, सहस्त्र-पादाक्षि-शिरोरु-बाहवे। सहस्त्र-नाम्ने**

पुरुषाय शाश्वते, सहस्र - कोटी -युगधारिणे नमः। दायाँ पाँव धोते हुये पढ़ें– ॐ नमः कमलनाभाय नमस्ते जलशायिने। नमस्ते केशवानन्त वासुदेव नमोस्तुते॥ अञ्जलि में जल उठा कर पढ़ें– गंगा-प्रयाग-गय नैमिष-पुष्करादि तीर्थानि यानि भुवि सन्ति हरिप्रसादत्। आयान्तु तानि कर पद्म-पुटे मदीये, प्रक्षालयन्तु वदनस्य निशाकलङ्कम्। इसी जल से मुँह धोते हुये पढ़ें– तीर्थे स्नेयं तीर्थमेव समानानां भवति मानः। शंस्यो-अरुरुषो धूर्तिः प्राणङ्मर्त्यस्य रक्षाणो ब्रह्मणस्पते। यज्ञोपवीत दोनों हाथों के अँगूठों में रख कर तीन बार गायत्री मन्त्र पढ़ते हुये धोयें– ॐ भूर्भुवः- स्वः तत्-सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्। यज्ञोपवीत को पहले दायें भुजा में डालते हुये पढ़ें– यज्ञोपवीतं परमं पवित्रं प्रजापते - र्यत् - सहजं पुरस्तात्। आयुष्यम्-अग्र्यं प्रतिमुञ्च शुभ्रं, यज्ञोपवीतं बलम्-अस्तु-तेजः, प्राणायाम कीजिये, प्राणायाम करके नमस्कार करते हुये पढ़ें– नमो-अग्नये-अप्सुषदे, नम इन्द्राय, नमो वरुणाय, नमो वारुण्यै, नमोऽपां पतये, नमोऽदभ्यः। स्नान करते हुये पढ़ें– ॐ तत्-विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुर्-आततम् तत्-विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत्-परमं पदम्॥ माथे पर सात बार पानी छिड़कते हुये पढ़ें– ॐ भूः, ॐ भुवः

ॐ स्वः, ॐ महः, ॐ जनः, ॐ तपः, ॐ सत्यम्। प्राणायाम तथा उपस्थान करते हुये पढ़ें– ॐ हंसः शुचिषत्-वसुरन्त- रिक्षसत् - होता - वेदिषत् - अतिथि-दुरोण-सत्। नृषत्-वरसत्, ऋत - सत्-व्योमसत्-अब्जा गोजा ऋतजा, अद्रिजा ऋतम्। सूर्यदेवता को नमस्कार करते हुये पढ़ें– नमो धर्मनिधानाय, नमः सुकृत साक्षिणे नमः प्रत्यक्षदेवाय भास्कराय नमो नमः। तर्पण करते हुये पढ़ें– ॐ नमो देवभ्यः यज्ञोपवीत गले में रखते हुये पढ़ें– स्वाहा ऋषिभ्यः, बायाँ यज्ञोपवीत रखकर तर्पण करते हुये पढ़ें– स्वधा पितृभ्यः दायाँ यज्ञोपवित रखकर पढ़ें– आब्रह्मस्तम्बपर्यन्तं ब्रह्माण्डं सचराचरं जगत्-तृप्यतु तृप्यतु-एवम्-अस्तु। गोविन्द गोविन्द हरे मुरारे, गोविन्द गोविन्द रथाङ्गपाणे, गोविन्द गोविन्द मुकुन्द कृष्ण गोविन्द गोविन्द नमो नमोस्तु।

स्नान करके सूर्य भगवान् के ओर नमस्कार करते हुये पढ़ें– ॐ गायत्र्यै नमः, सावित्र्यै नमः, सरस्वत्यै नमः। ॐ प्रणवस्य ऋषि-ब्रह्मा, गायत्रं छन्द एव च। देवोग्नि-व्याहृतिषु चः, विनियोगः प्रकीर्तितः, प्रजापते व्याहृतयः, पूर्वस्य परमेष्ठिनः, व्यस्ताश्चैव समस्ताश्च, ब्राह्मम् - अक्षरम् - ओम्-इति। व्याहृतीनां समस्तानां, दैवतं तु प्रजापतिः। व्यस्तानाम्-अयम्-अग्निश्च, वायुः

सूर्यश्च देवताः। छन्दश्च व्याहृतीनाम् - एकाक्षराणां - उक्ताख्यं, द्व्यक्षराणां - अत्युक्ताख्यम्। विश्वामित्र ऋषिश्छन्दो, गायत्रं सविता तथा देवतो पनये जप्ये, गायत्र्या योग उच्यते। आवाहयामि गायत्रीं, सर्वपापप्रणाशिनीम्। न-गायत्र्याः परं जप्यं, न व्याहृति-समं हुतम्। आगच्छ वरदे देवि, जप्ये मे सन्निधो भव। गायन्तं त्रायसे यस्मात् गायत्री त्वं ततः स्मृता। अग्नि-र्वायुश्च सूर्यश्च बृहस्पत्या-प एव च। इन्द्रश्च विश्वे देवाश्च देवताः समुदाहृताः। एवम्-आर्षं छन्दो दैवतं, विनियोगं चानु-स्मृत्य। गायत्र्या शिखां-आबद्ध्य, गायत्र्यैव समन्ततः। आत्मनश्चापः परिक्षिप्य प्राणायामं कुर्यात्। अपने आप को पानी छिड़क कर अंजलि धारण करते हुये पढ़ें– ॐ ओजोसि सहोसि बलं-असि भ्राजोसि देवानां धाम नामासि। विश्वं-असि विश्वायुः सर्वं-असि सर्वायुर्-अभिभूः तीन आचमन एक साथ करते हुये पढ़े :– ॐ सूर्यश्च मामन्युश्च- मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षन्ताम्। यत्-रात्र्या पापं-अकार्षं, मनसा वाचा हस्ताभ्यां, पद्भ्यां-उदरेण शिश्ना। रात्रिस्तत्-अवलुम्पतु, यत् किंचित् दुरितं मयीदम्-अहं-आपोऽमृत-योनौ सूर्य ज्योतिषि जुहोमि स्वाहा, अब सारे शरीर पर पानी छिड़कते हुये पढ़े– ॐ आपो हिष्ठा

मयोभुव-स्तान ऊर्जे दधातन महे रणाय चक्षसे। यो वः शिवतमो रस-स्तस्य भाजयते हनः। उशतीर्-इव मातरः। तस्मा-अरंगमाम वो, यस्य क्षयाय जिन्वथ आपो जनयथा च नः। ॐ शन्नो देवीर् अभीष्टये-आपो भवन्तु पीतये शंयोर अभिस्रुवन्तु नः। तीन बार आचमन करते हुये पढ़ें– ॐ अन्तः-चरसि-भूतेषु गुहायां विश्वतो मुखः। त्वं यज्ञस्त्वं वषट्कार-आपोज्यातिः रसोमृतं ब्रह्मभूर्भुवः स्वरोम्।

उपस्थान करते हुये पढ़ें:– शुक्रियं रुद्रस्य-य उदगात्-पुरस्तात्-महतो अर्णवात् - बिभ्राज - मानः सरिरस्य मध्ये। स माम्-ऋषभो रोहिताक्षः, सूर्यो विपश्चित्-मनसा पुनातु। यत्-ब्रह्मा-वादिष्म तन्मा मा हिंसीत्-सूर्याय बिभ्राजाय वै नमो नमः बायाँ यज्ञोपवीत रखकर सभी पितरों का तर्पण करके फिर से तर्पण करते हुये पढ़ें:– मातृपक्ष्या-स्तु ये केचित्-ये चान्ये पितृपक्षजाः। गुरु-क्श्वरशुर बन्धूनां ये कुलेष्षु समुद्भवाः, ये प्रेतभावम्- आपन्ना ये चान्ये श्राद्धवर्जिता, जलदानेन ते सर्वे लभन्तां तृप्तिम्-उत्तमाम् दायाँ यज्ञोपवीत रखकर तर्पण करते हुये पढ़ें:– ॐ नमो देवेभ्यः गले में यज्ञोपवीत रख कर स्वाहा ऋषिभ्यः बायाँ यज्ञोपवीत रखकर स्वधापितृभ्यः दायाँ यज्ञोपवीत रखकर पढ़ें:– आब्रह्मस्तम्ब - पर्यन्तं ब्रह्माण्डं सचराचरं। जगत्-तृप्यतु तृप्यतु तृप्यतु एवम् - अस्तु सूर्य देवता

को नमस्कार करते हुये पढ़ें:– **नमो धर्मनिधानाय नमः सुकृत-साक्षिणे नमः प्रत्यक्ष देवाय भास्कराय नमो नमः, शान्तिः पुष्टि-स्तथा तुष्टिः सन्तु मे त्वत्-प्रसादतः, सर्वपाप-प्रशान्तिश्च तीर्थराज नमोस्तुते।**

नोटः– यदि आप पूरी विधि अनुसार सन्ध्या करना चाहते हैं तो आप हमारे कार्यालय द्वारा छपाई हुई 'सन्ध्या' मंगा सकते है।

मुकुन्दमालास्तुतिः ।।

ॐ वन्दे मुकुन्दमरविन्ददलायताक्षं
कुन्देन्दुशङ्खदशनं शिशुगोपवेशम्।
इन्द्रादिदेवगणवन्दितपादपीठं
वृन्दावनालयमहं वसुदेवसूनुम्।। 1

श्री वल्लभेति वरदेति दयापरेति
भक्तप्रियेति भवलुण्ठनकोविदेति।
नाथेति नागशयनेति जगन्निवासे
त्यालापिनं प्रतिदिनं कुरु मां मुकुन्द।। 2

जयतु जयतु देवो देवकीनन्दनोयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः।
जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः।। 3

मुकुन्द मूर्ध्ना प्रणिपत्य याचे
भवन्तमे कान्तमियन्तमर्थम्।

अविस्मृतिस्त्वच्चरणारविन्दे
भवेभवे मेस्तु भवत्प्रसादात्।। 4
श्रीमुकुन्दपदाम्भोजमधुनः परमाद्भुतम्।
यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः।। 5
नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः
कुम्भीपाकं गुरुमपि हरे तारकं नापनेतुम्।
रम्या रामामृदु तनुलता नन्दने नापि रन्तुं
भावेभावे हृदयभवने भावयेयं भवन्तम्।। 6
नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्यद्भव्यं भवतु भगव न्पूर्वकर्मानुरूपम्।
एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेपि
त्वत्पादाम्भो रुहयुगगता निश्चला भक्तिरस्तु।। 7
दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक प्रकामम्।
अवधीरित शारदार विन्दौ
चरणौ ते मरणेपि चिन्तयामि।।8
सरसिजनयने सशङ्खचक्रे
मुरभिदि मा विरमेह चित्त रन्तुम्।
सुखतरमपरं न जातु जाने
हरिचरणस्मरणामृतेन तुल्यम्।। 9
माभैर्मन्दमनो विचिन्त्य बहुधा यामिश्चिरं यातना
नामी नः प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं

लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः।।
भवजलधिमगाधं दुस्तरं निस्तरेयं
कथमहमिति चेतो मास्मगाः कातरत्वम्।
सरसिजदृशि देवे तावकी भक्तिरेका
नरकभिदि निषण्णा तारयिष्यत्यवश्यम्।। 11
तृष्णातोये मदन पवनोद्धूतमोहोर्मिमाले
दारावर्ते तनयसहजग्राहसङ्घकुले च।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादाम्भोजे वरद भवतो भक्तिनावे प्रसीद।।
पृथ्वी रेणुरणुः पयांसि कणिकाः फल्गुः स्फुलिङ्गो लघु
स्तेजो निःश्वसनं मरुत्तनुतं रन्ध्रं सुसूक्ष्मं नभः।
क्षुद्रा रुद्रपितामहप्रभृतयः कोटाः समस्ताः सुरा
दृष्टे यत्र स तावको विजयते भूमा वधूतावधिः।।
आम्नायाभ्यसितान्यरण्यरुदितं कृच्छ्रव्रतान्यन्वहं
मेघच्छेदफलानि पूर्वविधयः सर्वं हुतं भस्मनि।
तीर्थानामवगाहनानि च गजस्नानं विनायत्पद
द्वन्द्वाम्भोरुहसंस्तुतिं विजयते देवः स नारायणः।।
भवजलधिगतानां द्वन्द्ववाता हतानां
सुतदुहितृ कलत्र त्राणभारा वृतानाम्।
विषमविषयातोये मज्जतामप्लवानां
भवति शरणमेको विष्णुपोतो नराणाम्।।
रजसि निपतितानां मोहजालावृतानां
जननमरणधूली दुर्गतिं सङ्गतानाम्।

शरणमशरणानामेक एवातुराणां
कुशलपथि नियोक्ता चक्रपाणिर्नराणाम्।।
अपराध सहस्त्र सङ्कुलं पतितं भीमभवार्णवोदरे।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु।।
यच्चिन्तितं च मनसा वचसा यदुक्तं
चक्षुः करश्रवणपादविचेष्टितं च।
यद्यन्निशासु दिवसेषु कृतं मयैव
तत्तज्जनार्दन तवार्चनमेव भूयात्।।
मा मे स्त्रीत्वं मा च मे दासभावो
मा मूर्खत्वं मा कुदेशेषु जन्म।
मिथ्यादृष्टिर्मा च मे स्यात्कदाचित्
जातौ जातौ विष्णुभक्तो भवामि।। 19
आनन्द गोविन्द मुकुन्द राम
नारायणानन्त निरामयेति।
वक्तुं समर्थोपि न वक्ति कश्चित्
अहो जनानां व्यसनानि मोक्षे।। 20
क्षीरसागरतरङ्गशीकरा सारतारकतचारु मूर्तये
भोगिभोगशयनीयशायिने माधवाय मधुविद्विषे नमः।।
क्षीरसारम्पनीय शङ्कया स्वीकृतं यदि पलायनं त्वया।
मानसे मम नितान्ततामसे नन्दनन्दन कुतो न लीयसे।।
वात्सल्याद भयप्रदानसमयादार्तार्तिनिर्वापणात्
औदार्यादघशोषणादगणितेश्रेयःपदप्रापणात्।
सेव्यः श्रीपतिरेव सर्वजगतामे कान्ततः साक्षिणः

प्रह्लादश्च विभीषणश्च करिराट्पाञ्चाल्यहल्या ध्रुवः।।
नाथे श्रीपुरुषोत्तमे त्रिजगतामेका धिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि परे नारायणे तिष्ठति
यं कंचित्पुरुषाधमं कतिपय ग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका वयम्।।
हे लोकाः! शृणुत प्रसूतिमरण व्याधेश्चिकित्सामिमां
योगज्ञाः समुदाहरन्ति मुनयो या याज्ञवल्क्यादयः।
अन्तर्ज्योतिरमेयमेकममृतं कृष्णाख्यमापीयता
तत्पीतं परमौषधं वितनुते निर्वाणमात्यंतिकम्।।
बद्धेनाञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमैः
कण्ठेन स्वरगद्गदेन नयनोद्गीर्णेन बाष्पाम्बुना।
नित्यं त्वच्चरणारविन्दयुगल ध्या नामृतास्वादिनाम्
अस्माकं सरसीरुहाक्ष! सततं सम्पद्यतां जीवितम्।।
तत्त्वं ब्रुवानाणि परं परस्मादत्

अहो क्षरन्तीव सुधां पदानि।
आवर्तय प्राञ्जलिरस्मि जिह्वे

नामानि नारायणगोचराणि।।
इदं शरीरं परिणामपेशलं

पतत्यवश्यं श्लथसन्धिजर्जरम्।
किमौषधैः क्लिश्यसि मूढ दुर्मते!

निरामयं कृष्णरसायनं पिब।। 28
श्रीमन्नाम प्रोच्य नारायणाख्यं

के न प्राप्ता वाञ्छितं पापिनोपि।

हा नः पूर्वं वाक् प्रवृत्ता न तस्मिं
स्तेन प्राप्तं गर्भवासादिदुःखम्।। 29
माद्राक्षं क्षीणपुण्यान् क्षणमपि भवतो भक्तिहीनान्पदाब्जे
माश्रौषं श्राव्यबद्धं तव चरितमपास्यान्यदाख्यानजातम्।
मास्प्राक्षं माधव त्वामपि भुवनपतिं चेतसापह्नवानं
माभूवं त्वत्सपर्याव्यतिकररहितो जन्मजन्मान्तरेपि।।
मदन परिहर स्थितिं मदीये मनसि मुकुन्दपदारविन्दधाम्नि।
हरनयनकृशानुना कृशोसि स्मरसि न चक्रपराक्रमं मुरारे।।
दारा वाराकरवरसुता तऽङ्गजोयं विरिञ्चिः
स्तोता वेदस्तव सुरगणो भृत्यवर्गः प्रसादः।
मुक्तिर्मध्ये जगदविकलं तावकी देवकीयं
माता मित्रं बलरिपुसुतस्तत्त्वतोन्यन्न जाने।।
जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वन्द्व समर्चयाच्युतकथाः श्रोत्रद्वय त्वं शृणु।
कृष्णं लोकय लोचनद्वय हरे र्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण मुकुन्दपादतुलसीं मूर्धन्नमाधोक्षजम्।।
यत्कृष्णप्रणिपातधूलिधवलं तद्वै शिरः स्याच्छुभं
ते नेत्रे तमसोजिते सुरुचिरे याभ्यां हरिर्दृश्यते।
सा बुद्धिर्नियमै र्यमैश्च विमला या माधवध्यायिनी
सा जिह्वामृतवर्षिण प्रतिपदं या स्तौति नारायणम्।।
भक्तद्वेषभुजङ्गगारुडमणिस्त्रैलोक्यरक्षामणि
गोपीलोचनचातकाम्बुदमणिः सौन्दर्यमुद्रामणिः।
श्रीकान्तामणि-रुक्मिणीघनकुचद्वन्द्वैकभूषामणिः

श्रेयो ध्येयशि खामणिर्दिशतु नो गोपालचूडामणिः।।
शत्रुच्छेदैकमन्त्रं सकलमुपनिषद्वाक्यसम्पूज्यमन्त्रं
संसारोत्तारमन्त्रं समुदिततमसां सङ्गनिर्याणमन्त्रम्।
सर्वैश्वर्यैकमन्त्रं व्यसनभुजगसन्दष्ट सन्त्राणमन्त्रं जिह्वे
श्रीकृष्णमन्त्रं जप जप सततं जन्मसाफल्यमन्त्रम्।।
व्यामोहोद्दलनौषधं मुनिमनोवृत्तिप्रवृत्त्यौषधं
दैत्यानर्थकरौषधं त्रिभुवने सञ्जीवनैकौषधम्।
भक्तार्त्तिप्रशमौषधं भवभयप्रध्वंसि दिव्यौषधं
श्रैयःप्राप्तिकरौषधं पिब मनः श्रीकृष्णनामौषधम्।।
आश्चर्यमेतद्धि मनुष्यलोके
सुधां परित्यज्य विषं पिबन्ति।
नामानि नारायणगोचराणि
त्यक्तान्यवाचः कुहकाः पठन्ति।।
लाटी नेत्रपुटी पयोधरघटी क्रीडाकुटी दोस्तटी
पाटीरद्रुमवर्णनेन कविभिर्मूढैर्दिनं नीयते।
गोविन्देति जनार्दनेति जगतांनाथेति कृष्णेति च
व्याहारैः समयस्तदेकमनसां पुंसां परिक्रामति।।
अयाच्यमक्रेयमयातयाम मऽयाच्यमऽक्षय्यमदुर्भरं मे।
अस्त्येव पाथेयमतिप्रयाणे श्रीकृष्णनामामृतभागधेयम्।।
यस्य प्रियौ श्रुतिधरौ रविलोकगीतौ
मित्रे द्विजन्मपरिवारशिवावभूताम्।
तेनाम्बुजाक्ष चरणाम्बुजषट्पदेन
राज्ञा कृता स्तुतिरियं कुलशेखरेण।। 41

श्रीराज्ञास्तुतिः

ॐ संसारसागरमहं तरितुं सुनौकां
राज्ञीं नमामि शिरसाशिवसुन्दरीं त्वाम्।।
सर्वेश्वरीं सकललोकसुखप्रदात्रीं
त्वामेव देवि सततं शरणं प्रपद्ये।। 1
मातः पयोधरयुगं पिबतु त्वदीयं
नागाननर्तुमुखवत्सलपुत्रयुग्मम्।।
निर्णेजनाम्बुन इह स्पृहयाम्यहं तु
त्वत्पादपद्मयुगलस्य भवाग्निशान्त्यै।। 2
मातस्त्वदीयपरितोष विशेषलब्धे
छत्रे प्रहृष्यतु सदा भगवान्सुरेन्द्रः।।
पीयूषवर्षणकरात्तव देवि पाद
च्छत्राद्विना किमपि राज्ञि न नाम याचे।। 3
मोहाटवीविकट संकटपीडितोऽहं
राज्ञी प्रपन्नपरमार्तिहरा त्वमेका।।
जाज्वल्यतेऽम्ब हृदयार्तिकरो ममान्तः
पापाग्निरेशि शमयैनममास्वरूपे।। 4
आरारटीमि करुणं भवतापतप्तः
प्रोल्लालपीमि पतितो भवदुःखसिन्धौ।।
मोमोर्मि राज्ञि लुठितो भवसर्पदष्ट
स्त्वामन्तरेण शरणं मम कः शरण्ये।। 5
राज्ञि प्रपन्नवरदे सुकृतादपर्णा

त्वामाश्रितोऽस्मि सुचिरात्तु महद्विचित्रम्।।
किं नास्मि भैरवि ऋणैस्त्रिविधैर्विमुक्तः
पाशैरिवोत्कट विषाक्तभुजङ्गमानाम्।। 6
राज्ञि प्रसीद नतसौख्यकरे मृडानि
रुद्राणि रोगहरणे चतुरे प्रसीद।।
शर्वाणि सर्वजनपापहरे प्रसीद
गौरि प्रसीद गुणगौरि शिवे प्रसीद।। 7
कल्याणि राज्ञि जगदीश्वरि विश्वमात
स्त्वामन्तरेण नहि देवि सुखं जनस्य।।
पुत्रस्य दुःखहरणे सततीद्यता द्राक्
मातैव हि स्नुतकुचा नु भवत्यवश्यम्।। 8
राज्यष्टकमिदं पुण्यं यः पठेद्धषपूरितः सोऽत्र द्राक्
प्राप्नुयात्कामान्परलोके च स्वर्गतिम्।। 9

श्री ज्वालामुखी स्तोत्रम्।

ॐ जाज्वल्यमानवपुषा दशदिग्विभागान्
सन्दीपयन्त्य भयपद्म गदावराढ्या।।
सिंहस्थिता शशिकलाभरणा त्रिनेत्रा
ज्वालामुखी हरतु मोहतमः सदा नः ।। 1
आब्रह्मकीट जननीं महिषीं शिवस्य
मुग्धस्मितां प्रलयकोटि रविप्रकाशाम्।।
ज्वालामुखीं कनककुण्डल शोभितांसां
वन्दे पुनः पुनरपीह सहस्रकृत्वः।। 2

देदीप्यमान मुकुट द्युतिभिश्च देवै
दासैरिव द्विगुणितांघ्रि नखप्रदीप्तिम्।।
ज्वालामुखीं सकलमङ्गलमङ्गलां ताम्
अम्बां नतोऽस्म्यखिल दुःखविपत्तिदग्धीम्।। 3
क्षित्यब्हुताश पवनाम्बर सूर्यचन्द्र
यष्ट्राख्य मूर्तिं मलानपि पावयन्तीम।।
ज्वालामुखीं प्रणतकल्पलतां शिवस्य
साम्राज्यशक्तिमतुलां महतीं नमामि।। 4
नौमीश्वरीं त्रिजगतोऽभयदानशौण्डां
ज्वालामहार्यभवजालहरां नमामि।।
मोहान्धकारहरणे विमलेन्दुकान्तिं
देवीं सदा भगवतीं मनसा स्मरामि।। 5
दुष्कर्मवायुभिरितस्तत एव दीप्तैः
पापज्वल ज्जवलन जात शिखाकलापैः।।
दग्धं च जीवयतु मां परितो लुठन्तं
देवी दयार्द्र हृदयामृत पूर्णदृष्ट्या।। 6
ज्वालामुखी ज्वलदनल्प लयाग्निकोटि
रोचिष्मती रविशशि प्रतिभानकर्त्री।।
भक्तस्य भर्गवपुषा भवभर्जनाय
भूयात्सदाभ्युदय दान वदान्यमुख्या।। 7
त्वं चौषधीशमुकुटा ऽहमसाध्यरोग
स्त्वं चित्प्रदीप्तिरहमत्र भवांध्यमग्नः।।
त्वं चाम्ब! कल्पतरुरेवमहं च भिक्षु

ज्वालामुखि प्रकुरु देवि यथोचितं मे।। 8
यद्ध्यानकेसरि समाक्रमणोत्थभीते
र्मर्मव्यथाजनकदु:खशतानि सद्यः।।
गोमायवन्ति परितो भृशकान्दिशीकान
स्मांश्च पालयतु सैव भवाब्धिदु:खात्।। 9
ज्वालामुखि क्षणमपीह विलम्बमम्ब
नार्तो ह्यनर्थपतितः सहते विपन्नः।।
हस्तस्थिता मृतकमण्डलु वारिणैव
मां मूर्च्छितं झटिति जीवय तापतप्तम्।। 10
बाह्यान्ध्यनाशनविधौ रविचन्द्रवह्नि
ज्योतींषि देवि दययाऽजनयः पुरा त्वम्।।
एतत्तु रूपमखिलान्तर मोहरात्रि
ध्वान्ताकारि तव यत्स्फुरतादतोऽन्तः।। 11
मन्ये त्रिधामनयने नयनत्रयं ते
भक्तार्तिनाशननिमित्तविलोकनाय।।
मातः परं यदपि देवि तथाप्यधन्य
स्त्वद्दृष्टिपात रहितोस्म्य हहा हतोऽस्मि।। 12
सत्यं ब्रवीमि शृणु चित्त मदान्ध मूर्ख
मागाः कदापि विषयान्विषमान्विषाक्तान्।।
ईशीमपारकरुणां भवभीतिभेत्रम्
अम्बां भवस्व सततं परसौख्यदात्रीम्।। 13
त्वं मे महेशि जननी परमार्तिहर्त्री
त्वं मे पिता हिततमस्त्वमहेतुबंधुः।। 14

ज्वालां जगज्जनन संहरणस्थितीनां
हेतुं गतिं मुषित लज्जित दुःखितानाम्।।
उन्मोचनां च भवबंधनदुर्गतीनां
त्वां नौमि नौमि शरणं शरणागतानाम्।। 15
ज्वालामुखीस्तवमिमं शृणुयात्पठेद्वा
यः श्रद्धया परमया बहुभक्तियुक्तः।।
भूयात्स दग्धबहुजन्म शतार्जिताऽघो
ऽविघ्नोप्यनेक जननाथित राज्यभूमिः।। 16

श्री शारिका स्तोत्रम्

ॐ अष्टादशै रसिगदादियुतै भुंजैर्या
त्रातुं समस्तभुवनानि विपद्भयेभ्यः।।
जागर्त्यशेषजन दुःखहरा परा सा
श्री शारिका दिशतु मङ्गलसन्ततिं नः।। 1
उद्यत्सहस्त्ररविभास्कर दीप्तिदीप्तां
सिंहासनां शशिकलाभरणां त्रिनेत्राम्।।
यां चिन्तयन्ति बहुभक्तिरसार्द्रचित्ताः
श्री शारिका दिशतु मङ्गलसन्ततिं नः।। 2
यत्पादयोः सकृदपीह कृतार्चनो ना
भक्त्यान्वितो ह्यनुभवत्य समरप्रभुत्वम्।।
श्री राजराज सखिसौख्य निवासभूमिः
श्री शारिका दिशतु मङ्गलसन्ततिं नः।। 3
सौदामनी प्रमदमत्त गजेन्द्रकर्ण

स्थित्या समापि भजते स्थिरतां विभूतिः।।
यत्पादपङ्कज युगाश्रयणात्सदा सा
श्री शारिका दिशतु मङ्गलसन्ततिं नः।। 4
यत्कीर्तन श्रवणसं मननोत्थपुण्यं
शक्नोति नो गणयितुं बहुधाप्यनन्तः।।
साऽशेषरोग दलनाय धृतौषधीशा
श्री शारिका दिशतु मङ्गलसन्ततिं नः।। 5
श्री मातृकाभिः उपसेवित पादधूल्या
प्रद्युम्नपीठ समवस्थितया ययेश्या।।
कश्मीरदेशजनता परिपाल्यते सा
श्री शारिका दिशतु मङ्गलसन्ततिं नः।। 6
यस्याः प्रदक्षिण परिक्रमणा त्सुभक्त्या
पापोऽप्यलं ध्यभवसागर पारमेति।।
